४० पत्राणि

स्मृतितत्त्वे प्रायश्चित्ततत्त्वम् - (धर्मशास्त्रम्)

नं ७०८ - घ

पत्राणि ४० (सम्पूर्णम्)

कर्त्ता रघुनन्दन भट्टाचार्यः

काशी बस्ता ३

त्राह्मिनमतरघुनंदनीका पत्रे ८०

भास्करतेत्रंप्रयागः इति १३ पत्रे

नं॰ ८०२५

[illegible]

लक्षणं

१ ॐनमोगणेशाय ॥ प्रणम्यसच्चिदानंदं सृष्टिस्थित्यंतकारिणं । प्रायश्चित्तस्यतत्वानि वक्तिः श्रीरघुनंदनः । प्रायश्चित्तस्य लक्ष्माच तथातं च प्रसंगको । कर्तृसंस्कार
कांगानां प्रतिकर्म्मनिवर्त्तनं । गोग्रासभक्षणाच्छुद्धिस्तदभावादशुद्धता । प्रायश्चित्तं भवेन्नित्यं काम्यं नैमित्तिकं तथा । काम्यादयंगणानो स्यात् क्रियांस्तत्र गणादयः ।
अज्ञाया लक्षणं पुण्यं मज्ञानादपि संभवेत । प्रायश्चित्ताद्द्विजातीयात्ता इकपापविनाशनं । गोधूमावयवेयव्यावयवस्तच साधकं । लाघवं गौरवं विष्यसकृदावृत्ति
कं तथा । दानव्रतादिनानेणापापमात्रस्यनाश्यता । चांद्रायणादौ ग्रासानां परिसंख्या व्यवस्थितिः । प्रायश्चित्ते गुरौ भूते लघुपापस्य च क्षयः । गंगामाहात्म्यविस्तारो राजावपि
च ततत्क्रिया । वागादिनाकृते पापे प्रायश्चित्तस्य हीनता । प्रायश्चित्ते तु वक्तव्येऽनुग्रहद्वयमेव हि । प्रायश्चित्तोपदेशादि चोराज्ञामविनिर्णयः । क्रयस्य निर्णय श्चापितह्वा
तेः कालनिर्णयः । प्रायश्चित्तस्यपूर्वाह्नकृत्यं वाल्यमिदातथा । धेनुमूल्यव्यवस्था च ज्ञानाज्ञाननिरूपणं । विप्रादिस्वामिभेदेन गोवधव्रतनिर्णयः । एकवर्षादिभेदे १
न रोधादेश्च निमित्तकः । अपालननिमित्तेन गोवधव्रतनिर्णयः । अपवादो गोवधस्य नरस्य च वधे तथा । चांडालपतितादीनां भोजनादेश्च भक्षणे । प्रायश्चित्तवि
धिस्तत्र कृतघ्नस्य निरूपणं । जवत्तादेस्तथोत्पत्तिस्तद्द्वास्यादौ व्रतं तथा । अन्त्यजाते: स्त्रियासंगे भोजने च प्रतिग्रहे । चांडालस्पृष्टतोयादौ गोमांसादौ च भक्षिते । भार्य्या
धंमात्रवचनेऽपवीतस्यभोजने । प्रायश्चित्तविवेकादौ ग्रंथ्यज्ञेयं विचक्षणैः ॥ अथप्रायश्चित्तस्यलक्षणं ॥ तत्रहारीतः ॥ प्रयतत्वाद्वोपचितमशुभं नाशयतीति प्रायश्चि
त्तमिति । यत्तपः प्रभृतिपचितं संचितमशुभं पापं नाशयतीति कृततत्तत्कर्म्मभिः कर्त्तुः प्रयत्नद्वाशुद्धत्वादेव तत्प्रायश्चित्तं । तथाच पुनर्हारीतः । यथाक्षारोपस्वेदनन्तु निर्नोद

तपःक्षालनादिनिर्वासं निःशुद्धं इति । एवं तपोदानयज्ञैः पापकृतः शुद्धिमुपयांति इति शुद्धिं पापक्षयं यथा भारते ॥ अद्भिर्गात्राणि नित्वतमोऽस्य ग्निमया यथा । दानेन तपसा चैव स
र्वं पापमपोहति । तेन पापक्षयमात्रसाधनत्वेन विधिबोधितं कर्म प्रायश्चित्तं । मात्रार्थत्वाभस्तु प्रयत्नादित्येवकारार्थकवाशब्दात् । तथाच विष्णुः । वाक्याद्विकस्योपनयोरेवा
र्थे च सर्वं क्षयेदिति । एवं चाश्वमेधेन शुद्धं इति महापातकिनस्त्विमे । इति विष्णूक्तस्याश्वमेधस्य प्रायश्चित्तत्वं । न तु पापक्षयस्वर्गोभयसाधनस्य प्रायश्चित्तत्वं । प्रायश्चित्तस्य
स्वध्वंसादिजनकत्वेपि तदंशे विधिबोधितत्वान्नासंभवः । अथ तंत्रप्रसंगौ । अनेकमुद्दिश्य सकृत्प्रवृत्तिस्तंत्रता । यथा दर्शपौर्णमासयोर्वाग्देयादीनां यदाग्नेयाष्टाकपा
लोऽमावास्यायां पौर्णमास्यां वाऽच्युतो भवति उपांशुयाजमंतरा यजति ताभ्यामग्निषोमीयमेकादशकपालं पौर्णमास्यां प्रायच्छत् ऐन्द्रं दध्यमावास्यायां ऐन्द्रं पयो भवत्यमा
वास्यायामिति कर्मज्ञापकरूपोत्पत्तिश्रुत्युक्तानां षण्णां प्रधानयागानां मध्ये आग्नेयाष्टाकपालैन्द्रदधिऐन्द्रपयोयागानां त्रयाणां आग्नेयाष्टाकपालोपांशुयाजाग्नीषो
मीयैकादशकपालयागानां त्रयाणां च सकृत्सकृदनुष्ठितेन प्रयाजाद्यंगेनोपकारः सिध्यति प्रयाजादयश्च समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति
स्वाहाकारं यजति इत्येवरूपाः पंच तथा नानाब्राह्मणवधसत्वे सर्वोद्देशेन सकृत्प्रायश्चित्ते कृते सर्वब्राह्मणवधजन्यपापनाशः यथा वधानुष्ठितो भविष्ये ब्राह्मणस्य
ब्राह्मणायो ब्राह्मणानां च पुत्रक । प्रायश्चित्तस्यैकत्वं जातिमाश्रित्य लक्ष्यते । क्षामवत्यादिनायच्चतत्कर्मणा पृथिवीपते । दैवदोषादकरणे जाते दोषकथं न्वके ।
होमेनैकेन दोषाणां सर्वेषां क्षयमादिशेत् । एवं चैकप्रायश्चित्तेनानेकदोषक्षयाय क्षामवतीष्टिः सर्वत्र दृष्टान्तः । तंत्रतापाहेतुश्चाह पृथ्थैर्थैकजातीयकर्मणः कालदेश

2 कर्त्रादीनांप्रयोगानुबंधवैधहेतुभूतानामभेदेऽद्दिश्यविशेषाग्रहइति एवंचस्नातोऽधिकारीभवतिदैवेपित्रेचकर्म्मणि इतिविस्मृतं। अस्नात्वानाचरेत्कर्म्मजपहोमादिकं
चनइतिदक्षोक्तं चक्रियांगस्नानं कर्तृसंस्कारद्वारैवतद्दिनकर्त्तव्याशेषकर्म्मार्थमेकमेवनतुप्रयत्नेप्रतिकर्म्मकर्त्तव्यं तच्चारुणोदयस्नानादपिसिध्यतिसर्वमर्हतिपूता
त्माप्रातःस्नायीजपादिकमितिदक्षोक्तेः। अस्नातस्यक्रियाःसर्वाःभवंतिह्यफलाः। प्रातःसमाचरेत्स्नानमतोनित्यमतंद्रितः। इतिविष्णुधर्म्मोत्तरोक्तेश्च। अस्नात
स्यपुमान्नार्होजपादिहवनादिषु। प्रातःस्नानंतदर्थंतुनित्यस्नानमुदाहृतं इतिशंखवचनाच्च। प्रातरित्यरुणोदयकालपरं। प्रातस्त्वप्यरुणाकिरणग्रस्तांप्राचीमवलो
क्यस्नायादितिविष्णुवाक्यैकवाक्यत्वात्। सूर्योदयंविनानैवस्नानदानादिकाःक्रियाः इतितुआह स्नानप्रधानकालपरं। दिवाकरकरैःपूतंदिवास्नानंप्रशस्यते इति २ प्रा
पराशरीये प्रशस्यतइत्येकवाक्यत्वात्। एवंच प्रदोषेघटिकायुग्मंप्रभातेघटिकाद्वयं। दिनवत्सर्वकर्म्माणिकारयेन्नविचारयेत् इति हस्तायुधधृतं गौणकालपरं।
घटिकाऽत्रदंडद्वयं। त्रियामांरजनींप्राहुस्त्यक्त्वाद्यन्तचतुष्टयं। नाडीनांतदुभेसंध्येदिवसाद्यन्तसंज्ञितेइत्येकवाक्यत्वात्। तथाचामरः। त्रियामाक्षणदाक्षपेति यथा
सूर्योदयपदंसूर्यकरपरं। विष्णुपुराणेऽप्युदितसूर्येकर्म्मानधिकारमुक्त्वाऽंशुस्पर्शेकर्म्माधिकारविधानात् यथासतकर्म्मयोग्योनजनोनैवापःसोचकारणां
यस्मिन्ननुदितेतस्मैनमोदेवायभास्वते। स्पृष्ट्वैवयदंशुभिर्लोकःक्रियायोग्योभिजायते। पवित्रताकारणायतस्मैशुद्धात्मनेनमः सूर्योदयात्प्रागपिप्रकाशेनतत्करिष
विद्यमानत्वात्। एवंचउपस्पृश्यद्विजोनित्यंशुद्धःपूतोभवेन्नरः। इतिमरीच्युक्तआचमनेनकर्तृसंस्काराभिधानात्शुद्धः प्रक्षालितपाणिपादइत्यर्थः। यज्ञोपवीति

नाचान्तोदकेन कृत्यमिति गोभिलोक्तं। क्रियां यः कुरुते मोहादनाचम्यैव नास्तिकः। भवन्ति हि वृथा तस्य क्रियाः सर्वा न संशयः। इति वायुपुराणोक्तं च कर्मांगाचमनं प्रयत्ने
प्रतिकर्म्मारंभे न कर्त्तव्यत्वं। अत एव पाठकामस्यैव प्रयतस्याचमनं। विशिष्य मन्वङ्गिरोबृहस्पतय आहुः। यथा सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतं वचः। पीत्वापोऽध्येष्य
माणश्च आचामेत् प्रयतोऽपि सन्। भोक्तुकामस्याप्याह आपस्तम्बः। भोक्ष्यमाणः प्रयतोऽपि द्विराचामेदिति तच्च द्विजस्य ब्राह्म्येण तीर्थेन। यथा याज्ञवल्क्यः। ब्राह्म्येण प्राग्वा तीर्थे
न द्विजो नित्यमुपस्पृशेत्। प्राक् प्राङ्मुख उपस्पृशेत् आचामेत् द्विज इत्युपादानात् न स्त्रीशूद्राविति मिताक्षरा। स्त्रीशूद्रयोस्तु देवेन तीर्थेन यथा नारदः। स्त्रियाश्चैव दशिकं तीर्थं शूद्र
जातेस्तथैव च। सकृदाचमनाच्छुद्धिरेतयोरेव चोभयोः। एवं च साधारणांगमात्रेऽपि प्रधानदेशकालान्वया नियम इत्युक्तं। यत्तु अंगानां प्रयोगविध्यैक्ये हि तन्त्रतेत्युक्तं।
ततक्रृष्टसंस्काराणि भिन्नानामेव। यथा श्राद्धभेदेऽर्घ्यादिनामपि अन्योद्देशेन प्रवृत्तावन्यस्यापि सिद्धिः प्रसंगः। यथा पश्वर्थमनुष्ठितेन प्रयाजादिना पशुतंत्रमध्यपातिनः पुरो
डाशस्याप्युपकारः सिध्यति। यथा वा तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति। वाजिभ्यो वाजिनमित्यत्रामिक्षार्थं प्रवृत्तावनुद्देश्यस्य वाजिनस्यापि सिद्धिः अत एव क्व
चिदामिक्षाया अपचारे आमिक्षा पुरुषं प्रयोजयति न वाजिनं तस्य प्रसंगसिद्धत्वादित्युक्तं। आमिक्षा घनीभूतं पयः। तथा च भट्टवार्त्तिकं। पय एव घनीभूतमामिक्षेत्यभिधीय
ते। तदवशिष्टं जलं वाजिनं। यथा वा काम्ययागनिष्पत्त्यर्थमनुष्ठितैराग्नेयादिभिर्नित्ययागसिद्धिरिति मिताक्षरोक्तं यथा वा दंडनिपातप्रायश्चित्तेनैव गुरुणा तन्नान्तरीयकाव
गोरणप्रायश्चित्तमपि सम्पद्यते। इति प्रायश्चित्तविवेकोक्तं। यथा वा ब्रह्मवधोद्देशेन द्वादशवार्षिके कृते क्षत्रियवधनिमित्तकत्रैवार्षिकप्रायश्चित्तस्य सिद्धिरिति। एवं च-

3 तत्र प्रसंगयोरनावृत्तेनैव कर्मणानानादृष्टफलसिद्धौ लाघवमेवहेतुः। ननु एवमपि गोरणाक्षत्रियवधप्रायश्चित्तयोः कथं प्रसंगेन सिद्धिः संकल्पादेरभावात्। तयोः संक-
ल्पादिः कुत इति चेत् प्रायश्चित्तत्वात् तथात्वेपि कथं संकल्प इति चेत् काम्यत्वात्। वक्ष्यमाणशंखलिखितवचनाच्च। तस्य काम्यत्वमाह जाबालः। काम्यानां स्वफलार्थं च
दोषघातार्थमेव च। अतः काम्यं नैमित्तिकं च प्रायश्चित्तमिति स्मृतिः। सहजतस्तत्र लोकप्राप्त्यादिफलकत्वेन काम्यानां चांद्रायणादीनां क्वचित् स्वफलार्थं दोषघातार्थं
च कर्त्तव्यत्वं स्वफलार्थं स्वर्चांद्रायणादिकं फलं येषां पापानां तानि तथा तदर्थं तन्निमित्तं पापनिमित्तमिति यावत् पापज्ञानवत् एव चांद्रायणाद्याचरणात् तत्फलत्वम-
तो नैमित्तिकत्वं दोषघातार्थं पापक्षयार्थं अतः काम्यत्वं आसत्तिक्रमेणान्वयः। अतः पापक्षयकाम्याधिकारित्वेन पापनिश्चयवदधिकारित्वेन च काम्यत्वं नैमित्तिक-
त्वं चेति द्वयोरेवावगम्यमानत्वात् जातेष्टिवदधिकारयोः सम्बलनमिति। एवं च काम्यस्य सर्वत्राप्यधिकरणे सर्वांगोपेतस्यैव फलवत्त्वाभिधानात् तस्यापि प्रसंगविषयत्वेन २ प्रा
काम्ये हि काम्याभिलापसहितकुशतिलजलत्यागरूपः संकल्पः शास्त्रार्थ इति प्रक्रमाधिकरणोक्तेन प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत्। प्रायश्चित्तमुपासीनो वाग्यत-
स्त्रिसवनं स्पृशेत् इति शंखलिखितवचने प्रत्येकं नियतं कालमिति तत्तद्व्रतकालसंख्यात्मनो व्रतमात्मसम्बन्धित्वेन आत्मकर्तृकत्वेनेति यावत्। तेनाद्य व्रतमहं करिष्ये
इत्याद्युल्लेखं कुर्यादित्यनेन च प्राप्तस्य संकल्पस्य बाधः। एवं तदंते दक्षिणायाः शुद्ध्यर्थं श्राद्धस्य च बाधः। तदभिहितं मविष्ये क्रियते शुद्धये यत्तु ब्राह्मणानां च भोज-
नं। शुद्ध्यर्थमिति तत् प्रोक्तं वैनतेय मनीषिभिः। यत्तु शुद्धये इति प्रायश्चित्तस्यादौ तदाह जाबालः। आरंभे सर्वकृच्छ्राणां समाप्तौ च विशेषतः। श्राद्धं कुर्याद्व्रतस्यान्ते गोहिर-

णायादिदक्षिणां। इति वाचस्पतिमिश्र आह तन्न समासा प्रावित्यस्याव्याख्यातत्वात् व्रतस्यांत इत्यस्य पुनरुक्तत्वापत्तेश्च श्राद्धविवेककारकस्तु आरंभे इत्यर्द्धानन्तरं श्राद्धेनैव
हिरण्यानामग्नौ जुहुयाद्वाहुतीः पृथक्। इत्यर्द्धमधिकं लिखितवंतः। प्रायश्चित्तानंतरं पापक्षयार्थं श्राद्धं कर्त्तव्यमिति व्याख्यातवन्तश्चेति। शानाग्नावित्युपादानात् साग्नेरेव हो
मः व्रतस्येति प्रायश्चित्तमात्रोपलक्षणं भविष्ये शुद्ध्यय इति सामान्यतोभिधानात् अन्यथा त्रैमासिकव्रताद्युक्तदक्षिणाविशेषः। तदतुकस्य धेनुदानादौ प्रायश्चित्तविवेकाद्यु
क्तोपि न स्यात्। वृषभैकादशादद्यात् सुचरितव्रत इत्यभिधानात्। एवं च शुद्धिहेतु पार्वणश्राद्धं जीवत्पितृकेनापि कर्त्तव्यं संस्कारांगवृद्धिश्राद्धवत् जीवे पीतरि वै पुत्रः श्रा
द्धकालं विवर्जयेत्। येषां वापि पिता दद्यात् तेषामेके प्रचक्ष्यते इति हारीतवचनोत्तरार्द्धेन प्रधानसांगताद्यर्थं श्राद्धविधानात्। एवं प्रायश्चित्तोत्तरकर्त्तव्यपापक्षयज्ञापकगोग्रा
सस्यापि वाधः यथाचरितव्रतविधौ याज्ञवल्क्यः। घटेऽपवर्जितज्ञातिमध्यस्थो यवसं गवां। प्रदद्यात्प्रथमं गोभिः सत्कृतस्यापि सत्क्रिया। अपवर्जितप्रक्षिप्ते प्रायश्चित्ते
तु चरिते पूर्णकुंभमपां नवं। तेनैव श्राद्धं प्राश्येयुः स्नात्वा पुण्यजलाशये इति मनूक्तेः तेन ज्ञातिना प्राश्येयुः क्षिपेयुः कृतप्रायश्चित्ता इति शेषः। गवां सत्कारश्च तद्दत्ततृणाभ
क्षणमेव यदि तु गावस्तद्दत्ततृणं न गृह्णीयुस्तदा प्रायश्चित्तं पुनरनुतिष्ठेत्। यथा हारीतः स्वशिरसा यवसमुदाय गोभ्यो दद्याद्यदिताः प्रदत्तदिता गृह्णीयुः अथैनं प्रवर्त्तयेयुः। एनं
कृतप्रायश्चित्तं प्रवर्त्तयेयुः विति इतरथा नेत्यभिप्रेतमिति मिताक्षरा। एवं च हारीतयाज्ञवल्क्यवचनैकवाक्यतयावश्यमाणमनुवचनद्वयमपि सामान्यप्रायश्चित्तेरेवकर्त्त-
व्यता परं न तु प्रकरणाद् सततप्रतिग्रहमात्रपरं। ततश्चासत प्रतिग्रहमात्रतया यत्कुल्लूकभट्टव्याख्यानं तत्प्रदर्शनमात्रं। एवं घटापवर्जनमपि न पतितमात्रविषयं। तथा च मनुः

५ उपवासकृसंतन्तुगोव्रजातपुनरागतं । प्रणतंपरिपृछेयुः साम्यंसौम्येछसीति किं । सत्यमुक्त्वातुविप्रेषुविकिरेद्यवसंगवां । गोभिप्रवर्त्तिते तीर्थे कुर्युस्तस्य प्रतिग्रहं । सत्यमितिनैत
त्पापंपुनः करिष्यामीति तीर्थे गोभिस्तृणाभक्षणेन पवित्रीकृते देशे उच्यते । प्रायश्चित्तस्य नित्यत्वे नांगवैकल्येपि फलसिद्धिः । तथाच प्रायश्चित्तस्य काम्यत्वं नित्यत्वं नैमित्तिकत्वं च
मिताक्षराकृदाह नैमित्तिकोयं प्रायश्चित्ताधिकारः अर्थवादावगतपापक्षयोपि जातेष्टिन्यायेन साध्यतया स्वीक्रियते । नचहारीतपरिजिहीर्षुणा अनुष्ठीयते एतावतापि काम्या
धिकारमात्रकार्याशंका यस्माच्चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये । निंदैश्च लक्षणैर्युक्ता जायंते निष्कृतैनसः । इति मनुवचनेऽकरणे दोषश्रवणेनावश्यकत्वावगमात् । त
था याज्ञवल्क्यः । प्रायश्चित्तमकुर्वाणा पापेषु निरता नराः । अपश्चात्तापिनः कष्टान्नरकान् यान्ति दारुणान् । प्रायश्चित्तमकुर्वाणाः महान नरकारकान्यान्ति प्राप्नुवन्ति इ ४ प्रा
त्यन्तेन । वस्तुतस्तु पूर्वोक्तमनुवचने नित्यमितिश्रवणान्नित्यत्वं अतएव सर्वैरेव निबंधभिः श्राद्धविशेषस्य नित्यत्वे एतांस्तु श्राद्धकालान्वै नित्याना प्रजापतिः । इत्यभिहितं ।
तथाचोक्तं नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत । उपेत्यातिक्रमे दोषश्रुतेरत्यागदर्शनात् । फलाश्रुतेर्वीप्सयाच तन्नित्यमितिकीर्त्तितं । तस्मात्कर्त्तव्यमेवेऽ प्रायश्चित्तं वि
शुद्धये तस्मादितिशंखलिखितवाक्ये एवकारेण नियमादवश्यकरणं प्रतीयते । अवश्यकरणं चाकरणान्निवृत्तिः तदतिक्रमे तु विहितस्याननुष्ठानान्निंदितकर्मणस्य च
सेवनात् । अनिग्रहस्येन्द्रियाणां नरः पतनमृच्छति । इति याज्ञवल्क्यवचनेन तदतिक्रमे प्रत्यवायश्रुतेश्च नित्यत्वं । एवं अंगिरसापि कृतेनिः संशये पापेन भुंजीतानुपस्थितः । भुंजा
नो वर्द्धयेत पापमसत्यं पर्षदि ब्रुवन् । इत्यनेन पापवतो भुंजानस्य प्रायश्चित्तार्थमनुपस्थितस्य पापवृद्धेर्दर्शनात् प्रायश्चित्तस्य नित्यत्वमभिहितं । स्मृतिसागरे देवलः । कालाति

रेके द्विगुणं प्रायश्चित्तं समाचरेत्। द्विगुणं राजदंडं च दत्वा शुद्धिमवाप्नुयात्। कालातिं संवत्सरातिरेके संवत्सरानिसप्तस्य दुष्टस्य द्विगुणो दमः इति मनुवचने संवत्सरात्
परतो द्विगुणदंडदर्शनेन दंडवत् प्रायश्चित्तानि भवंतीति वचनेन एकत्र निर्णीतः शास्त्रार्थो बोधकमन्तरेणाप्यन्यत्रापि तथेति न्यायादाकाङ्क्षीत्वेन प्रायश्चित्तेपि तथैव युक्तत्वा
त्। अधिकन्यूनकाले तु तदनुसारादेव व्यवस्थेति। अत एव यथा क्षारोपस्वेदचंडनिर्णोदिन प्रक्षालनादिभिर्वासांसि शुद्ध्यन्ति। एवं तपोदानव्रतयज्ञैः पापकृतः शुद्धिमुपया
न्ति ध्मायमाना इव धातवो आग्नेयादोषेभ्यस्तस्मात् क्षिप्रं मोहात् भयात् स्नेहात् लोभात् प्रमादाद्वा अशुभं कृत्वा सद्यः शौचमाचरेत् इति हारीतेन सद्यः करणमुक्तं। अत्र व्यवहार
चिंतामणौ विशेषः। नाष्टम्यां न चतुर्दश्यां प्रायश्चित्तपरीक्षणं। न परी[illegible]क्षा विवाहश्च शनिभौमदिने तथा। एवं च प्रायश्चित्तस्य नित्यत्वे जाबालेनोक्तं काम्यत्वं कथं संग
च्छतां हि काम्यत्वं अनित्यत्वं असति कामे परित्यक्तुं शक्यत्वात् तथा सत्वे कस्य कर्मणो नित्यत्वकाम्यत्वाभ्यां द्वैरूप्यांगीकारे नित्यानित्यसंयोगविरोधः नैवं संयोगपृथक
त्वन्यायात्। स च न्यायश्चतुर्थाध्याये उक्तः यथा खादिरे पशुं बध्नाति खादिरं वीर्यकामस्य यूपं कुर्वीतेति श्रूयते। अत्र संशयः किं काम्यस्य खादिरता नित्येपि स्यात् उत नेति। अ
त्र क्षणार्थत्वे नानित्यतया नित्यप्रयोगांगता न युक्ता यत्तु नित्येपि खादिरत्वश्रवणं तत् काम्यस्यैव पशुबंधनाय यूपाश्रयत्वानार्थं अतो न नित्ये खादिरतेति प्राप्ते राद्धान्ता
यस्तूक्तं। एकस्योभयत्वे संयोगपृथक्त्वमिति अत्र संयोगः संबंधमात्रं एकस्य खादिरस्य क्रत्वर्थपुरुषार्थरूपोभयात्मकत्वे वाक्यद्वयेन च फलशेषत्व क्रतुशेषत्वल
क्षणासंयोगभेदावगमान्न नित्यानित्यसंयोगविरोधः। न चात्र यज्ञानार्थं नित्यवाक्यं संविधानादेराश्रयलाभात् अतः उभयार्थो खादिरतेति। एवं दध्ना जुहोति दध्नेंद्रिय —

5 कामस्येत्यादावुभयार्थेनैवदधित्वस्य विधिश्रवणात्। तस्मान्नायश्चित्तं नित्यं काम्यं नैमित्तिकं च इति। अतोयत्र प्रसंगसंभावना तत्र नित्यत्वात् काम्याभिलापदक्षिणाद्यंगं विनापि प्रधा
नानिष्पत्तिः अतएव क्षयं केचिद्यदुपात्तस्य दुरितस्य प्रचक्षते। अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्वते। नित्यक्रियां तथैवान्ये ह्यनुसंगस्य फलां श्रुति मिति ज्ञावासम विष्यपुरा
णाभ्यांसंकल्पादिकं विनापि संध्यादिवत् नित्यकर्म्मणा कृतेनैव पापक्षयउक्त इति नित्यक्रियां नित्यां क्रियायस्याः श्रुतेः तां प्राप्येति शेषः क्षणामिति पाठे छांदसत्वं केवलवेगो
णादैत्तेप्रकारांतरकृतप्रधाननिष्पत्तिरूपबाधकाभावेन काम्यत्वात् काम्याभिलापसंकल्पादिरपि क्रियते। वस्तुतस्तु काम्ये नैमित्तिके नित्ये वा वैदिकमात्रे यथाकथंचिद्रू
पेण प्रधाननिष्पत्तौ नांगानुष्ठानार्थं प्रधानावृत्तिः। तथा च छंदोगपरिशिष्टं। प्रधानस्य क्रियायत्र सांगं तत्क्रियते पुनः। तदंगस्याक्रियायां तु नावृत्तिर्न च तत्क्रिया। अतए ५ प्रा
व नांदीमुखप्रकरणशेषे प्रधानानामपि काम्यानां तत्तद्देशकालविहितानां तंत्रेनैव सिद्धिरिति श्राद्धचिंतामणिः। अथैवं मुमुक्षोर्नित्यकरणात् कथं न काम्यफलसिद्धिरिति
चेन्न। सम्यक्संसाधनं कर्म्म कर्त्तव्यमधिकारिणा। निस्कामेन सदापार्थ काम्यं कामान्वितेन च। इति भविष्यपुराणे। न स्वर्गादिकाम्ये कामनावत एवाधिकारात्। अतएव का
म्यो नैमित्तिको वार्थो नित्यमर्थं विहत्याभिनिवेसने नित्यमित्युक्तं। द्वादशाध्याये। सम्यक्संसाधनं पथमा कल्यादिना साधनं कारणं यस्य तत्तथा अधिकारिणा अर्थिना समर्थे
नविदुषा निष्कामनेति नित्यपरं मुमुक्षुपरं च। अतएव मार्कंडेयपुराणेपि फलार्थिनं प्रतितत्तत्फलदातृत्वं तदनर्थिनं मुमुक्षुं प्रति मुक्तिदातृत्वं पितृणामाह रुचिः। पितॄ
न्नमस्ये दिवि ये च मूर्त्ताः स्वधाभुजः काम्यफलाभिसंधौ। प्रदानशक्ताः सकलेप्सितानां विमुक्तिदा येनभिसंहितेषु। एवं देवतानामपि फलदातृत्वमधिकारिभेदेनेति ॥

अथांगहीने काम्येपि फलं। ननु काम्येऽप्यंगाभावेपि फलमस्ति हि। सांगावैदिककर्म्मणः फलावश्यंभावनियम इत्यस्य सर्वशास्त्राधिकरणोक्तस्य कागतिरिति चेत् समग्रफल
विषयतयेति गृहाण। तथा च कल्पतरौ योगियाज्ञवल्क्यः। श्रद्धाविधिसमायुक्तं कर्म्म यत् क्रियते नृभिः। सुविशुद्धेन भावेन तदानंत्याय कल्पते। श्रद्धा शास्त्रार्थे दृढ प्रत्य
यः। प्रत्ययो धर्म्मकार्येषु तथा श्रद्धेत्युदाहृता। नास्ति ह्यश्रद्दधानस्य धर्म्मकृत्ये प्रयोजनमिति देवलवचनात्। अथांगप्रकर्षात् फलप्रकर्ष उक्तः। अंगाप्रकर्षे तु लक्षणाभा
व किंतु फलाल्पत्वमाह योगियाज्ञवल्क्यः। आर्षं छंदश्च दैवत्यं विनियोगस्तथैव च। वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः। मंत्राणामिति शेषः नित्यं तु युज्यते विशेषतो विशेषफला
य। अविदित्वा तु यः कुर्याद्याजनाध्यापनं जपं। होममंतर्जलादीनि तस्य चाल्पफलं भवेत्। अंतर्जलादीनि जलमध्ये क्रियमाणानि अघमर्षणजपादीनि होमम् अन्यच्च यत्-
किंचिदिति क्वचित्पाठः। अत एव प्रतिनिधावंगहानेरावश्यकत्वेपि काम्यायामपि देवप्रतिष्ठायां विहितद्रव्याभावेपि प्रतिनिधिमाह कल्पतरौ भविष्यपुराणे। कांचनं रजितं
लं च सर्वभावे विनिक्षिपेत्। दद्याद्विजौषधिस्थाने सहदेवां यवानपि। सहदेवा मेदिन्युक्ता। यथा सहदेवा बलादंडोत्पलयोः सारिवौषधौ। सहदेवीति सर्पपरव्या सहदेवीति पां
डवी। प्रायश्चित्तविवेकेपि पापवत् पुण्येपि अज्ञानाज्ञाने द्वैगुण्यमाह आपस्तंबः। यः प्रमत्तो हन्ति प्राप्नोति दोषक्षणां संकल्पन भूयः। एवमन्येष्वपि दोषवत्सु कर्म्मसु
तथा पुण्यक्रियासु चेति। यथा ब्रह्मवधादिषु पापस्य निषिध्यते तत्रोपयुक्त ब्राह्मणत्वादिज्ञाने द्वैगुण्यं तथा गंगादिस्नानादिषु पुण्यस्य विधेयतावच्छेदक गंगादिज्ञाने द्वैगुण्यं
ततः गंगादिज्ञानं विनापि पुण्यसंभवत्येव किंतु गंगादिज्ञाने यथा न तथेति एवं चाज्ञानकृतपुण्यकर्म्मणः स्वर्गादिकामनां विनापि तत्फलसिद्धेर्न फलकामनाया अवश्यापेक्षा-

6 अतएवप्रासंगिकानुसंगिकफलसिद्धिरप्युपपन्ना। अतएव विष्णुपुराणे आकाशवागपि अश्रुत्वापि वचः किंचित्कृतं भवति कर्म्मणा इति प्रासंगिकादीतरस्नानकृतपुण्य कर्म्म-
णि तु स्वर्गादिकामनाया: संभवाद्वैगुण्यफलार्थं कामनादपेक्षन्ते धीमन्तः। व्यक्तं प्रतिष्ठाकांडेकस्यतरौ विष्णुसमर्पणो भविष्यपुराणे। सुकृतं दुष्कृतं वापि ज्ञानतोऽज्ञानतोपि वा। त
त्सर्वमात्मना सार्द्धं मयातुभ्यं निवेदितं। एवं ज्ञानाभावादभिलापादेः कः प्रसंगः। तथाच विष्णुपुराणे भगवद्विष्णुपादांगुष्ठ विनिर्गत जलस्यैतन्माहात्म्यं यन्न केवलमभिसंधि
पूर्वकस्नानाद्युपयोगेषूपकारक मनभिसंहितमपेत प्राणस्यास्थि चर्म्मस्नायु केशाद्युत्सृष्टं शरीरजमपि तदुपरिपतितं सद्यः शरीरिणां स्वर्गं नयतीति। तथा शिवरात्रिव्रते दैववशासं
पन्नलुब्धकदेहसंसर्गिजलश्रीफलपत्रपातादिना श्रीमहादेवप्रीतिरित्यादि दर्शनाच्च अंगहीनादपि प्रधानात्फलसिद्धिरिति अतएवाद्यंगं विनापि यथाकथंचिद्दीयते ६ प्रा
इति व्यवहारः। तथाच दानरत्नाकरे। सर्वत्र गुणवद्दानं स्वपाकादिष्वपि स्मृतं। देशे काले विधानेन पात्रे दत्तं विशेषतः। गुणावत्फलवत्। देशेकृष्णसारप्रचरणादेशे। तत्रापि
स्वभूमौ परभूमौ तु तद्दत्तमतायां यथा महाभारतं। नाननुज्ञात भूमिर्हि यज्ञस्य फलमश्नुते। यज्ञस्येति वैदिककर्म्मोपलक्षणं। कालेग्रहणादितरकाले। विधानेन प्राङ्मुखत्वादि
ना पात्रे विद्यातपस्यादिगुणयुक्ते दत्तं दानं विशेषतः समग्रफलायेत्यर्थः। तथाच दृष्टान्तायाज्ञानकृतपापस्य भवदेव भट्टेनापि शूद्रगत वस्त्रादिदानकामस्य भ्रान्त्या ब्राह्म
णगत वस्त्रादि दानत्वेपि कामनाकृतब्राह्मणगतदानफलं। अपितु ब्राह्मणगतदानमात्रफलमित्यभिहितं। एवं च दानादिधर्म्मो मयाकर्त्तव्य इति सम्यक्संकल्पजनिते
क्वापि धर्म्मकारणं सम्यक्संकल्पजः कामो धर्म्ममूलमिदं स्मृतमिति याज्ञवल्क्यवचनात्। तथा धर्म्मीयपुनरारंभः संकल्पोपि न निष्फल इति तट्टीकायां। यत्तयोगियाज्ञ

वल्क्यवचनं। विधिहीनं भावदुष्टं कृतमश्रद्धया चयत्। तद्धरंत्यसुरास्तस्य मूढस्य दुष्कृतात्मनः इति तत् पूर्वोक्तश्रद्धाविधिसमायुक्तमित्यस्य प्रशंसार्थं। यथा व्यस्ततिथिनिन्दा
युग्मतिथिप्रशंसार्था। अन्यथा वाक्यभेदः स्यात् पूर्वोक्तापस्तंबादिवचनविरोधश्च स्यात्॥ ०॥ अथ विजातीयपापप्रायश्चित्ताद्विजातीयपापनाशः॥ ०॥ तथा च प्रायश्चित्तविवे
के। दंडनिपातप्रायश्चित्तेनैव गुरुणा तन्नांतरीयकावगोरणप्रायश्चित्तमपि सम्पद्यते इत्युक्तं। ननु दंडनिपातप्रायश्चित्तात्तदनंतरः पातिनो ऽवगोरणप्रायश्चित्तस्य कथं सिद्धिः
तथा हि मनुः। अवगूर्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने। अवगूर्य ब्राह्मणताडनार्थं दंडमुद्यम्य शतजातनाजनकं यत्पापमुत्पादितं तत्क्षयकामः कृच्छ्रं प्राजापत्यं चरेत्। तदुक्तं
शंयवधिकरणे। शंयोः प्रजापतेः प्रार्थनया देवैर्ब्राह्मणावगोरणफलत्वेन शतयातना विहिता। तथा च श्रुतिः। शंयुः प्रजापतिः प्रजाविनेता प्रजाहितेरतश्च देवानां हविर्वहन् ग्रा
शिषो ऽयाचत देवतास्त्ववगोरणे शतयातनास्त्वित्याशिषो ऽददत इति। शास्त्रदीपिकादौ दर्शपौर्णमासप्रकरणे देवा वै शंयुं बार्हस्पत्यमब्रुवन् हव्यं नो वहेति किं मे प्रजाया इति
ते ऽब्रुवन् यो ब्राह्मणायावगुरेत्तं शतेन यातयेत् यो निहन्यात्तं सहस्रेण यो नो हितं न करोत् यावतः पांशून् अभ्यनक्ति तावतः परिवत्सरान् स स्वर्गात् प्रच्यवते तस्मान्नावगुरेत् न ह
न्यात् न लोहितं कुर्यात् इति इतिहासात्मकं ब्राह्मणं च अत्र संशयः। अवगोरणादिनिषेधो ऽयं दर्शार्थः पुरुषार्थो वेति। अत्र पूर्वपक्षः प्रकरणाद्दर्शार्थो ऽयं दर्शे ह्यवगोरणादि
कं न कार्यमित्यर्थः। तदुक्तं फलाभावात् क्रतोश्चापि प्रकृतत्वात्तदर्थतेति अत्र राद्धान्तो जैमिनिसूत्रं। शंयौ सर्वपरीदानादिति शंयौ शंयुपदयुक्ते प्रागुक्तब्राह्मणसंज्ञके दे
वगोरणाद्यभावो न तु दर्शयागांगं कुतः सर्वपरीदानात् प्रकरणाद्वाक्यस्य बलवत्त्वेन सर्वस्मिन्काले ऽवगोरणादीनां खंडनात् तदुक्तक्रमत्वात्तु फलस्यायं पुरुषार्थो न तत्

क्रतोरिति। ननु कथमाशुविनाशिनोऽवगोरणस्य कालान्तरभावितयातनाहेतुत्वमिति चेन्न। अत्र लिङ्ङ्वयश्रुतेर्हेतुहेतुमतोर्लिङिति पाणिनिसूत्रानुशिष्टलिङ्गनवगोरणशतया
तनयोर्हेतुहेतुमद्भावोऽवगम्यते। आशुविनाशिनस्तदनुपपत्त्या द्वारीभूतदुरितापूर्वकल्पनात्। एवं पंचम्यास्तृतीयया विशेषणेन च साधनत्वं प्रतीयते यथा याज्ञवल्क्यः। विहि
तस्याननुष्ठानान्निंदितस्य च सेवनात्। अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छति। मनुः। शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः। वाचिकैः पक्षिमृगतां मानसैरंत्यजातितां।
यमः। सुरापो ब्रह्महा गोघ्नः सुवर्णस्तेयकिन्नरः। पतितैः संप्रयुक्तश्च कृतघ्नो गुरुतल्पगः। एते पतन्ति सर्वेषु नरकेष्वनुपूर्वशः। अत्रैते सुरापादयः पतंतीति सुरापादीनां पत
नकर्तृत्वावगतेः कर्तृत्वं च साधनत्वविशेषः। अतः सुरापानादिविशिष्टस्य पतनसंबन्धे विशेषणस्य सुरापानादेः पतनसाधनत्वमवगम्यते। अत्र च चिरध्वस्तं फलाया
लं न कर्म्मेति शयं विनेति न्यायेनावगोरणाद्यापाररूपं पापं शतयातनादेः कारणं कल्प्यते। तत्र यद्यपि पापस्य कार्य्यान्वितं च तत्सत्त्वायाम प्रामाण्यं प्रतिभातितदाह जै ७ प्रा
मिनिः। आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति। आम्नायस्य वेदस्य क्रियार्थत्वात् कार्य्यप्रतिपादकत्वात् प्रामाण्यं अतदर्थानां कार्य्याप्रतिपादकानामानर्थक्यम
प्रामाण्यमिति तथापि यथा विधिनात्वेकवाक्यत्वात् स्तुत्यर्थत्वेन विधीनां स्युरिति तद्भूतार्थानां क्रियार्थेन समाम्नायात् इत्याभ्यां जैमिनिसिद्धान्तसूत्राभ्यां क्वचिद्विधिश
क्तिरेवावसीदन्ती स्तुत्यादिभिरुन्नम्यत इति विध्येकवाक्यत्वात् क्वचिद्भूतार्थानां सिद्धार्थानां क्रियार्थेन सहैकवाक्यत्वाद्य प्रामाण्यमुक्तं। तथा चापि। क्षारोपस्वेदचंड नि
र्नोदनप्रक्षरणादिभिर्वासांसि शुद्ध्युपयन्ति ध्मायमानाऽवधातवोऽग्नौ दोषेभ्यस्तस्माद्विश्रम्भात् स्नेहाल्लोभात् भयाद् शुभं कृत्वा सद्यः शौचमारभेदिति हारीतादिप्रायश्चित्त

विधिवाक्यसमभिव्याहारात्पापक्षयसत्त्वे प्रामाण्यमिति। याज्ञवल्क्यः। विप्रदंडोद्यमे कृच्छ्रमतिकृच्छ्रं निपातने। कल्पतरुमिताक्षरयोर्गौतमः। अथातः कृच्छ्रान्व्याख्या
स्यामो हविष्यान्प्रातराशान्भुक्त्वा तिस्रो रात्रीर्नाश्नीयदथापरं त्र्यहं नक्तं भुंजीताथापरं त्र्यहमयाचितं भुंजीताथापरं त्र्यहमुपवसेदिति। अयमेव मनुना प्राजापत्यत्वेन परिभा-
षितो यथा। त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं। त्र्यहं परं तु नाश्नीयात् प्राजापत्यं चरन्द्विजः। ग्राससंख्या पराशरेणोक्ता। सायं द्वाविंशतेर्ग्रासाः प्रातः षड्विंशतिः स्मृता
अयाचिते चतुर्विंशः परं चानशनं स्मृतं। अतिकृच्छ्रमाह मनुः। एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्ववत्। त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन्द्विजः। त्र्यहाणि त्रीणि नवाहानि
पूर्ववत्प्रातः सायमयाचितैः प्राजापत्यवत्। यमः। अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभक्षणात्। अत्रैव ग्रासपाणिपूरणान्नभक्षणयोः शक्ताशक्तभेदेन विकल्पः एतत्द्वादशा
हसाध्यमतिकृच्छ्रं। एवं चातिकृच्छ्रमध्ये कथं कृच्छ्रसिद्धिः। नह्येकग्रासादिमध्ये द्वाविंशत्यादिग्रासाः सम्भवंति सत्यं नियमपक्षे एव दोषं भवतु परिसंख्यापक्षे तु नैष दोषः। एक
ग्रासातिरिक्तभोजनाभावेपि द्वाविंशतिग्रासाद्यतिरिक्तभोजनाभावः सिध्यति। एवं चेद्भवतु। दंडनिपातप्रायश्चित्तदेवगोरणप्रायश्चित्तसिद्धिः। किन्तु ब्रह्मचारिणा गुरुदारग
मनप्रायश्चित्ते नैव गुरुणा लघ्ववकीर्णिप्रायश्चित्तं कृतं भवेदिति प्रायश्चित्तविवेककृदुक्तं कथं संगच्छतां तथा हि याज्ञवल्क्यः। आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः।
छित्वा लिंगं वधस्तस्य सकामायाः स्त्रिया स्तथा। तथा अवकीर्णी भवेद्गत्वा ब्रह्मचारी च योषितं। गर्दभं पशुमालभ्य नैरृतं स विशुद्ध्यति। अत्र मरणेन कथं यागसिद्धिरिति
चेत्। मरणे वैकल्पिके चतुर्विंशतिवार्षिकव्रतप्रतिनिधिधेनुदाने एतद्यागप्रतिनिधिधेनुदानसंभवात् गुरुप्रायश्चित्तेनापि लघुपापनाशस्य वक्ष्यमाणत्वाच्च। अथ यत्र विहित

8 यवादीनामवघातादिनाशे यवादिसाध्यत्वं पुरोडाशस्य नस्यादिति अतोऽवयवपर्यन्तः शास्त्रार्थः। तत्र तदवयवानामपचारप्रतिनिधीभूतगोधूमादिगतयवाद्यवयवेषु प्रत्य
भिज्ञासंभवात् प्रतिनिधिन्यायावसर इति। अथ गोधूमादिगताः कथं यवाद्यवयवाः न खल्वन्यत्रान्यावयवाः संभवन्ति। अवयवाः खलु केचन यवादिमात्राणां केचन गोधूमा
दिमात्राणां केचन उभयवर्गाणां निष्पादकाः तत्रोभयनिष्पादकानामुभयत्र संभवाद्गोधूमादिगता यवयवा यवाद्यवयवत्वेन प्रत्यभिज्ञायन्ते व्यवह्रियन्ते च। किंतु यवादिमा
त्रारंभकानामभावात्तदितरमात्रारम्भकानां च संभवान्न यागादीनां पूर्णा निष्पत्तिः। अतो मुख्यालाभ एव प्रतिनिधिरिति। अत एव जीमूतवाहनप्रभृतिभिरुक्तं। यथा मुद्गा
पचारे माषप्रतिनिधौ मुद्गानां माषाणां च यज्ञसंबंधेऽयज्ञीया वै माषा इति माषा निषिद्धा माषगतमुद्गावयवोपादानेपि माषाणां यज्ञसंबंधो नास्तीति वक्तुं न शक्यते। माषानि
श्रितानामेव यज्ञसंबंधप्रतीतेरित्यं तेन तत्र माषानिश्रितानामिति माषमात्रारंभकावयवानिश्रितानामित्यर्थः। अन्यथा मुद्गेपि उभयारंभकावयवत्वे माषारंभकस्यापि सत्वा ८ प्रा
त् यागेन ग्रहणमनुपपन्नं स्यात्। अत एवोक्तं यत्र यत्र सौसादृश्यं तत्र तत्रावयवानां भूयस्त्वेन त्यागायोगात् सुसदृशा एव गृह्यन्ते। तस्याप्यसंभवे तु यत्किंचिदवयवसत्वे-
नापीति। परिशिष्टप्रकाशेपि यत्र विहिततद्द्रव्यावयव एव प्रत्यभिज्ञायन्ते यथा गवये गवावयवास्तत्र हि प्रतिनिधिन्याय इत्युक्तं। एवं च व्रताचरणाधेनुदानयोः प्रतिनिधिन्या
यासंभवात् कथं प्रतिनिधित्वमिति च वचनाद्भविष्यति। यथा मनुः। ख्यापनेनानुतापेन तपसाध्ययनेन च। पापकृन्मुच्यते पापात्तथा दानेन चापदि। आपदीत्यनेनाध्ययनतप
सोर्दानं प्रतिनिधिरित्यर्थः। मरणायागादीनामपि तपस्त्वं। यैर्यैर्व्रतैरपोहेत इत्युक्त्वा मरणस्यापि मनुनोक्तत्वात्। उमेति च पलापुत्रीनक्षमं तावकं वपुः। सोढुं क्लेशस्वरूपस्य

तपसः सौम्यदर्शने इति मत्स्यपुराणोक्तेर्वैध क्लेशस्वभावत्वाच्च । उभेतिच फलवत्वमिति शेषः । अतएव शातातपः । देवार्थे च पितॄणां च ब्राह्मणार्थे च नित्यशः । स्वेचि
न्वतां स्वदत्तेषु योनः क्लेशः स मनस्तपः । स्वं धनं चिन्वतां संचयं कुर्वतां स्वदत्तेषु प्रतिग्रहादिषु इति कल्पतरुः । अत्र विशेष्य दानमाह संवर्त्तः । हिरण्यदानं गोदानं भूमिदानं
तथैव च । नाशयन्त्याशु पापानि महापातकयान्यपि मनुः तिलान्ददाति यः प्राज्ञस्तिलानस्पृशति खादति । तिलैः स्नातस्तिलान्जुह्वत् सर्वं तरति दुष्कृतं । अग्निपुराणं ॥ ब्रह्मह
त्याकृतं पापकर्मापि पूतः मन्त्रदानात प्रणश्यति । अन्नदः पापकर्मापि पूतः स्वर्गे महीयते । हिंसात्मके तु दानस्य प्राधान्यं तपसः प्रतिनिषिध्यत्वमाह मनुः । दानेन वधनि
र्णेकं सर्पादीनामशक्नुवन । एकैकशश्चरेत्कृच्छ्रं द्विजः पापापनुत्तये । वधनिर्णेकं वधाशौचं । वस्तुतस्तु पापक्षय साधनत्वेनोक्तानां कृच्छ्रचांद्रायणादीनां यथाकथं -
चित् येनकेनाप्यनुष्ठितेन यस्य कस्यापि पापस्य क्षयः तथा च विश्वामित्रः । कृच्छ्रचांद्रायणादीनि शुद्ध्यभ्युदयकारणं । प्रकाशे च रहस्ये च संशये नुक्तके स्फुटे । प्राजाप
त्यः सांतपन शिशुकृच्छ्रः पराककः । अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्रातिकृच्छ्रकः । महासांतपनः शुद्धेत मकृच्छ्रस्तु पावनः । जलोपवासकृच्छ्रस्तु ब्रह्मकूर्चास्तु
शोधकः । एते व्यस्ताः समस्ता वा प्रत्येकमेकशोपि वा । पातकादिषु सर्वेषु पापकेषु प्रयत्नतः । कार्याश्चांद्रायणौ युक्ताः केवला वा विशुद्धये । शिशुचांद्रायणं प्रोक्तं य
तिचांद्रायणन्तथा । यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृतिः । उपवासस्त्रिरात्रं च मासः पक्षस्तदर्द्धकं । षडहं द्वादशाहादि कार्यं शुद्धिफलार्थिना । उपपातकयु
क्तानामनादिष्टेषु चैव हि । प्रकाशे च रहस्ये च अभिसन्ध्याद्यपेक्षया । जातिशक्तिगुणानहृष्ट्वा सकृद्बुद्धिकृतं तथा । अनुबन्धादिकं दृष्ट्वा सर्वं कार्यं यथाक्रमं । प्रकाशे

वहुभिर्ज्ञाते पाप इति शेषः। रहस्येव हुनिरज्ञाते संशये पापस्य अनुक्ते निपातक घष्टान्यतमत्वेन विशेषतोऽनुक्त प्रकीर्णक इति यावत्। आदि शब्द विवरणं प्राजापत्य इत्यादि
सौम्यः सौम्य कृच्छ्रः। व्यस्ता असमस्ता अनेकश इति यावत्प्रत्येकं एकमेकं प्रतित तथा पापमिति शेषः। षडह द्वादशाहादीत्यत्रादि शब्दोयमनुक्तसर्वप्रायश्चित्तपरिग्रहार्थः
अथैवं समस्ता इति निर्विषयं स्यात् न ह्येकत्र मरणाद्द्वादशवार्षिकादि संभव इति चेन्न कामतः शूद्रकर्तृकाग्निहोत्रादिगुणयुक्त ब्राह्मणवधे विषयसंभवात्। चतुर्गुणान्तु शूद्रा
णांपर्षदुक्ता महात्मना। पषदूष्वव्रतं प्रोक्तं शुद्धये पापकर्मिणां। अथ मानां तु वर्णानामुत्कृष्टहनने रहे। दोषोगुरुतरो ज्ञेयः क्षत्रादीनां न संशयः। इति मविष्ये। ब्राह्मणापेक्ष
याचतुर्गुणप्रायश्चित्त श्रुतेः। समद्विगुणसाहस्रमानन्त्यं च यथाक्रमं। दाने फलविशेषः स्याद्धिंसायां तद्वदेव हि इति दक्षवचनाच्च। अत्र द्वादशवार्षिकव्रताद्यनन्तरम ८ प्रा
पिमरणासम्भवात्। व्रतन्तु द्वादशवार्षिकादतिरिक्त कालं न भवति। यच्च यावज्जीवव्रतं तदपि द्वादशवार्षिकं द्वैगुण्येन संकालितं। अन्यथा तत्संसर्गिणो जीवनकालानिय
तत्वेन प्रायश्चित्तकल्पनानध्यवसायापत्तेः एवमेव प्रायश्चित्तविवेकः। अभिसंधेस्तारतम्यं मार्दपोषणापरदाघ्यादिना जाते स्तारतम्यं ब्राह्मणत्वादिना शक्ते वीलत्वादि
ना अनुवन्धः पौनः पुण्येनाभिनिवेशः॥ १०॥ अथ चांद्रायणादौ भोजनपरिसंख्या॥ भोजनस्य रागप्राप्तत्वान्नाप्राप्तप्रापको विधिः। सचाहरहः सन्ध्यामुपासीतेत्येवंरूपः नापि
तद्भक्षणस्यावश्यकत्वेन स्वयोगव्यवच्छेदमात्रफलकरूपो नियमविधिः॥ सच तत्तत्तिथौ न ग्रासानधिकं भुंजीतैवेत्येवंरूपः। तथा च श्रुत्या व्यवच्छिद्यमाने तु यत्रावश्यं क्रियाक्व
चित्। चाद्यते नियमः सोऽत्र अतावभिगमोयथा इति। तथात्वे पितृमरणादावपि भोजनं प्रसज्येत। हविष्य भोजनव्रतादावपि उपवासाभावश्चापद्येत। तद्भक्षणस्य सम काल मेवा

न्यभक्षणेऽपि न दोषः स्यात् तस्मात् अगत्या श्रुतार्थस्य परित्यागाद् अश्रुतार्थस्य कल्पनात्। प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदोषिका। इति श्रुत्युक्तस्वार्थहान्यस्वार्थकल्पनाऽऽगतप्रा
प्तबाधरूपदोषत्रयदुष्टाऽप्यन्ययोगव्यवच्छेदफलिका परिसंख्यैवेयुक्ता। सा च सति भोजने तत्तत्तिथौ तत्तद्ग्रासानेव भुंजीत नान्यदित्येवंरूपा तस्यास्तदतिरिक्तभोजनाभावपरत्वेन
उपवासेऽपि दोषाभावः। तदुक्तं भट्टपादैः। अन्यार्थश्रूयमाणो च यान्यर्थप्रतिषेधिका। परिसंख्या तु सा ज्ञेया यथा प्रोक्षितभोजनं। अन्यथा प्राजापत्यव्रतेऽपि त्र्यहमद्यादयाचितमि
ति अयाचितन्तु मध्याह्ने चतुर्विंशतिरुद्धय इति ब्रह्मपुराणोक्तस्यायाचितस्यालाभे व्रतलोपापत्तिः स्यात्। चतुर्विंशतीति चतुर्भिरधिका विंशतिर्यत्र तत्तथा अयाचितन्तु स्व-
कीयानुद्योगेन पराहृतदत्तं वस्तु। तथा च यतिधर्मे उशना। भिक्षाशनमनुद्योगात् प्राक्केनापि निमंत्रितं। अयाचितन्तु तद्भक्ष्यं भोक्तव्यं मनुरब्रवीत्॥ याज्ञवल्क्यः॥ अ
याचिताहृतं ग्राह्यमपि दुष्कृतकर्मिणः। अन्यत्र कुलटाषंडपतितेभ्यो द्विषस्तथा। एतेन तदानीमयाचितत्वेन गृहस्थितमयाचितमिति निरस्तं। प्राजापत्ये परिसंख्याव्यक्त
माह गौतमः। अथापरं त्र्यहं न कंचन याचेऽइति। तथा प्रायश्चित्तविवेककृद्भिरपि। अन्नादिजातप्राणिवधे मनूक्तघृतप्राशनस्य प्रायश्चित्तरूपत्वात् शवानुगमननिमित्तक
इव शरीरशुद्धिहेतुरूपत्वाभावादन्नान्तरनिवृत्तिरवसीयते इति वदद्भिः सर्वप्रायश्चित्ते परिसंख्योक्ता दुर्गसिंहेऽपि अश्राद्धभोजीत्यस्य सति भोजनेप्यश्राद्धमेव भुंक्ते न श्राद्धं
अन्यथा यदोपवासव्रतं तदा व्रतलोपः स्यात्। यथा स्नानं मया कर्त्तव्यमिति नियमे सत्यस्नानाद्व्रतभंग इत्याह। अत एव लघुभूयस्त्वमुपपद्यत इति अत्र विशेषयति बौधायनः।
अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः। हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधं। अत एव फलाहारादौ तथाचारः। अथ गुरुप्रायश्चित्तेन। लघुपापनाशः। पापे गुरुणि गु

10 रणीस्वस्थान्यस्येचतद्विदः। प्रायश्चित्तानि मैत्रेय जगुः स्वायंभुवादयः। इति विष्णुपुराणवचनात्। एवं विषयभेदात्वै व्यवस्थाप्यानि पुत्रक। प्रायश्चित्तानि सर्वाणि गुरूणि च लघू
नि च। अन्यथा हि महतां वा हेलघूनामुपदेशतः। गुरूणामुपदेशाद्धि निष्प्रयोजनतां व्रजेत्। इति भविष्यपुराणवचनात्। अल्पसाध्ये हि दुःसाध्यं श्रावयेत सततं जने। यथा पापे
न वर्त्तेत प्रायश्चित्तभयादितः। न निर्दिष्टो दस्य साध्यं प्रायश्चित्तं नरे बुधः। तस्मिन् संक्रमते पापं कर्त्तातु तत् विमुच्यते। इति गंगावाक्यावलीधृतस्कन्दपुराणे वचनात्। य
स्मिन् कर्म्मणि यस्य पुंसः कृते मनसः स्यात् लाघवं। तस्मिंस्तावत्तपः कुर्य्याद्यावत्तुष्टिकरं भवेदिति मनुवचनात्। अभ्यस्तानभ्यस्ताभ्यां कृच्छ्रचान्द्रायणादीनीत्यादि विश्वामित्र
वचनैः सर्वप्रायश्चित्तानां सर्वपापक्षयहेतुभोक्ताः एवं च पापविशेषे प्रायश्चित्तविशेषोपदेशो मुनीनां तत्तुल्यप्रायश्चित्तांतरप्रदर्शनार्थः। अन्यथा प्रायश्चित्तविशेषक
ल्पनायामनध्यवसायः स्यादिति। अतएव विश्वामित्रेणापि। कृच्छ्रांस्तु चतुरः कुर्य्यादित्यादि विशेषवचनेनेदमभिहितं। तेन प्राजापत्यादि साध्यपापक्षयस्य तदन्यूनक्लेश १० प्रा
साध्यप्रायश्चित्तान्तरसाध्यतापि अतएव प्राजापत्यव्रताशक्तौ धेनुं दद्यात् पयस्विनीमिति प्राजापत्यानुकल्पत्वेन श्रुतं धेनुदानं तत्तुल्यत्वेन संकलय्य पापान्तरेपि क –
ल्प्यते अतएव बौधायनेन सामान्यत उक्तं। बहूनामेकधर्म्मिणामेकस्यापि यदुच्यते। सर्वेषामेव तत् कुर्य्यादेकरूपा हि ते स्मृताः इति। एवं पूर्वोक्तागर्हितपशुयागसाध्यपापना
शस्यापि तदधिकक्लेशेन मरणेन प्रसंगात् सिद्धिः। अतएव ब्रह्मवधपापक्षयार्थिनो गोसहस्रदानेन तदनधिकसर्वपापक्षयमाह अंगिरा। गवां सहस्रं विधिवत् पात्रेभ्यः प्रति
पादयेत्। ब्रह्महा वै प्रमुच्येत सर्वपापेभ्य एव हि। यमः। गवाह्निकं देवपूजा वेदाभ्यासः सरित्प्लवः। नाशयंत्याशु पापानि महापातकयान्यपि। गवाह्निकं गोर्दिनभक्ष्यं

त्रयादि अपिनाहृहत् पापनाशकस्य सुतराम् अल्पपापनाशकता वगम्यते। तथा च छन्दोगपरिशिष्टं। वेदाश्छन्दांसि सर्वाणि ब्रह्मा द्याश्च दिवौकसः। जलार्थिनोऽथ पितरो
मरीच्याद्यास्तथार्षयः। उपाकर्म्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः। यियासून् अनुगच्छन्ति संहृष्टाः स्वशरीरिणः। समवायस्त्वयं चैषां तत्रान्येवहवो मताः। नूनं सर्वे क्षयं या
न्ति किमुते कंनदीरजः। एषां वेदादीनां पवनदीजले समवायस्तत्र गुरुतराण्येव ब्रह्महत्यादयो दोषाः कार्त्स्न्येन नाशं यान्ति किमुतैकं नदीरज इति। अत एवाविज्ञातगर्भवधे
पुरुषशंकया पुरुषवधप्रायश्चित्तमेवोक्तं गुरुणा पुरुषवधप्रायश्चित्तेन लघुनः स्त्रीवधपापस्य क्षयसंभवात्। यथा वशिष्ठः। ब्राह्मणं हत्वा भ्रूणहा भवति अविज्ञातं च
गर्भं अविज्ञाता हि गर्भाः पुमांसो भवन्ति तस्मात् पुंस्त्वाज्जुह्वति इति प्रायश्चित्तविवेकः। महाभारते च। यद्यकार्यशतं कृत्वा कृतं गंगाभिषेचनं। सर्वं दहति गंगांभस्तू
लराशिमिवानलः॥ अथ गंगामाहात्म्यं भविष्ये। गच्छन् तिष्ठन् स्वपन् ध्यायन् जाग्रद्भुञ्जन् श्वसन् वदन्। यः स्मरेत् सततं गंगां स च मुच्येत बंधनात्। तथा भवनानि विचि
त्राणि विचित्राभरणाः स्त्रियः। आरोग्यं वित्तसम्पत्तिर्गंगास्मरणजं फलं। ब्रह्मांडे। ये पुनाय वाहिनीं गंगां सकृद्भक्त्यावगाहिता। तेषां कुलानां लक्षं तु भवात्तारयते शिवा
दानधर्म्मे॥ अंधाः क्लीवा जडा व्यंगा पतिता ये गिरिणोऽत्यजाः। गंगां संसेव्य पुरुषा देवैर्गच्छन्ति तुल्यतां। स्कांदभविष्ययोः। स्नानमात्रेण गंगायां पापं ब्रह्मवधादिकं। दुराधर्षं क
थं यातीति चिन्तयेद्यावदेदपि। तस्याहं प्रददे पापं कोटिब्रह्मवधोद्भवं। स्तुतिवादमिमं मत्वा कुंभीपाकेषु पच्यते। आकल्पं स नरकं भुक्त्वा ततो जायेत गर्दभः। ब्रह्मांडे। ये ग
च्छन्ति स्वतो गंगां परांश्च प्रेरयन्ति ये। इह ते सर्वभोगानां अंते ज्ञानस्य भाजनं॥ यज्ञपार्श्वपरिशिष्टं। वित्तान्यर्जयितुं युक्तः प्रवासो ह्यग्निहोत्रिणः। वित्तो हि सर्वं भवेद्दिज्यातीर्थाद्य-

॥ र्थं न तु व्रजेत्। स्कांदमात्स्ययोः। तीर्थयात्रादिकं कृत्यमकुर्वाणोपि मानवः। गंगातोयस्य माहात्म्यात् सोऽप्यत्र फलभाग्भवेत्। यात्राकरणे तु भविष्यपुराणे॥ गंगास्नानसमायुक्तो
विधिना स्वगृहं ततः। निर्गत्य मध्ये च नरः कुदेशे म्रियते यदि। गंगास्नानफलं सोपि नियतात्मा लभेत्तदा। समायुक्तः सम्प्रयुक्तः विधिना यथोक्तविधिना। यथाविधि कृतयात्र इ
त्यर्थः। तद्विधिमाह ब्रह्मपुराणे। योयः कश्चित्तीर्थयात्रान्तु गच्छेत्सुसंयतः स च पूर्वं गृहे स्वे कृतोपवासः शुचिरप्रमत्तः संपूजयेद्विधिवद्भक्तिनम्रो गणेशं। देवान् पितॄन् ब्रा
ह्मणांश्चैव साधून् धीमान् प्रीणायन् वित्तशक्त्या प्रयत्नात्। प्रत्यागतश्चापि पुनस्तथैव देवान् पितॄन् ब्राह्मणान् पूजयेच्च। एवं प्रकुर्वतस्तस्य तीर्थे यदुक्तं फलं तत्स्यान्नात्र संदेह
एव। सुसंयतः पूर्वदिने कृतैकभक्तादिनियमः। तदुत्तरदिने कृतोपवासः। तदुत्तरदिने गणेशं ग्रहान् इष्टदेवतां च संपूज्य वृद्धिश्राद्धं कृत्वा ब्राह्मणान् भोजयेत्। ततः शुभलग्ने
यात्रां कुर्यात् तीर्थयात्रां तु गच्छेदित्युपक्रमाद् उपवासदिने मुण्डनमपि। प्रयागे तीर्थयात्रायां पितृमातृवियोगतः। कचानां वपनं कुर्याद्वृथा न विकचो भवेत् इति निन्दपुराण ११ श्रा
वचनात्। प्रवेशेपि तीर्थयात्रायामिति वक्तव्यं। गच्छन्देशांतरं यत्तु श्राद्धं कुर्यात्तु सर्पिषा। यात्रार्थमिति तत्प्रोक्तं प्रवेशे च न संशयः। इति भविष्यपुराणादिति गंगावाक्या
वली। वस्तुतस्तु तीर्थप्रत्यागमनोत्तरस्वगृहप्रवेश इति वक्तव्यं। यात्राप्रत्यागमनोत्तरप्रवेशयोर्भेदात्। प्रत्यागमनोत्तरलाभस्तु प्रत्यागतश्चापीति प्रागुक्तेः। व्यक्तमाह हरा
युधधृतकूर्मपुराणे। तीर्थयात्रासमारंभे तीर्थात्प्रत्यागमेपि च। वृद्धिश्राद्धं प्रकुर्वीत बहुसर्पिःसमन्वितं। ततश्च प्रवेशे चेति चकारेण श्राद्धमात्रं समुच्चितं। न तु तस्य यात्रा
र्थत्वमपीति एवं देवान् पितॄन् इत्यभिधानात्। तत्तत्पूजनमेव पुनस्तथैव कार्य्यं न तूपवासादिकमपि अन्यथा देवानित्यादिकं व्यर्थं स्यात्। मत्स्यपुराणे॥ तिलोदकांजलि

दैयाज लस्थैस्तीर्थवासिभिः। सदानहस्तेनैवकेन गृहेश्राद्धं समिष्यते। अत्र जलस्थैरित्यनेन स्थलस्थानामपि जलस्थत्वं नियम्यते। ततश्च अन्तरुदके आचान्तोंतरेवपूतो भवति
वहिरुदके आचांतो वहिरेव शुद्धो भवति। तस्मादन्तरेकं वहिरेकञ्चपादं कृत्वा आचामेत् सर्वत्र शुद्धो भवतीति पैठीनस्युक्तेन जलैकचरणकृताचमनेनोभयत्र कर्म्माईत्वात् तर्पण
काले तीर्थे जलैकचरणत्वं प्रतीयते। अन्यत्र त्वनियमः। तद्रूपाणांजलेतर्पणमविरुद्धमिति। गृहस्थस्य सोपलक्षणं। देवीपुराणे। अकालेप्यथवा काले तीर्थश्राद्धं तथा नरैः। प्रा
प्तैरेव सदा कार्यं कर्त्तव्यं पितृतर्पणं। पिण्डदानं तु तच्छस्तं पितॄणां चातिदुर्लभं। विलंबो नैव कर्त्तव्यो न च विघ्नं समाचरेत्। श्राद्धं तत्र तु कर्त्तव्यमर्घ्यावाहनवर्जितं। स्वध्वांक्ष
गृध्रकाकानां नैव दृष्टिहतं च यत्। ध्वांक्षो दंडकाकः। अत्राकाल इति नराचादिपर्युदस्तप्रतिप्रसवः। तथात्वे तद्बाधापत्तेः। किंतु पर्युदस्तेतराप्रशस्तकालपरं। ततसाहश्यमप
भाश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिता इत्यनुन्यासारात्। काल इति कुतपमारभ्य मुहूर्त्तपंचकं। प्रशस्तापराह्नकालपरं अत्र शुचे प्राप्तु
नरविहित प्रथमदिन एव श्राद्धं तेन पूर्वदिने राक्षसी वेलादावागमनेपि परदिने श्राद्धमविरुद्धं। तथा च हलायुधधृतं गत्वैव तीर्थे कर्त्तव्यं श्राद्धं तत्प्राप्तिहेतुकं पूर्वाह्ने-
प्यथवा प्रातर्देशः स्यात् पूर्वदक्षिणे पूर्वाह्ने संगवे पूर्वदक्षिणेऽग्निकोने पिंडदानमिति श्राद्धासंभवे केवलमपि पिंडदानमिति तिन पैठीनस्युक्तं पिंडप्रतिक्षेपः पत्तिमाह मत्स्यपुरा
णे पिंडांस्तु गोजविप्रेभ्यो दद्यादग्नौ जलेपि वा। तीर्थश्राद्धे सदा पिंडान् क्षिपेत् तीर्थे विचक्षणः। महाभारते। यो लुब्धः पिशुनः क्रूरो नास्तिको विषयी दधीः। सर्वतीर्थेष्व
पि स्नातः पापो मलिन एव सः। तथा विषयेष्वतिसंरागो मानसो मल उच्यते। तेष्वेव हि विरागोस्य नैर्मल्यं समुदाहृतं। पिंडदानतपःशौचं तीर्थसेवाश्रुतं तथा। सर्वाण्येता

१२ न्यतीर्थानियदि भावोन निर्मलः। भावः सात्त्विकराजसतामसान्यतमममनोवृत्तिः। सचनिर्मलः सात्विकइत्यर्थः। एतानितीर्थकृतान्यपि अतीर्थानि अतीर्थकृतानि तथाप्रतिगृहाद
पावृत्तः संतुष्टोयेनकेनचित्। अहंकारविमुक्तश्च सतीर्थफलमश्नुते। अकल्कको निरारंभो लघ्वाहारो जितेंद्रियः। विमुक्तः सर्वसंगैर्यः सतीर्थफलमश्नुते। अकल्ककोदं
भरहितः निरारंभोर्थार्जनादिव्यापाररहितः संगोत्राविहिताशक्तिः अनुपोष्यत्रिरात्राणितीर्थान्यनभिगम्यच। अदत्वाकांचनंगाश्च दरिद्रो नामजायते। अग्निष्टोमादिभिर्यज्ञैरि
ष्ट्वाविपुलदक्षिणैः। नतत्फलमवाप्नोति तीर्थाभिगमनेनयत्। शंखः। तीर्थंप्राप्यानुसंगेनस्नानेतीर्थे समाचरन्। स्नानजंफलमाप्नोतितीर्थयात्राफलंनतु। तीर्थंनप्रतिगृह्णीयात्
पुण्येष्वायतनेषुच। निमित्तेषुच सर्वेषु अप्रमत्तोभवेन्नरः। निमित्तेषु संक्रान्त्यादिषु तथा। स्वकार्य्येपितृकार्य्ये वादेवताभ्यर्चनेपिवा। निष्फलंतस्यतत्तीर्थंयावत्तद्धनम १२ प्रा
श्नुते। शंखः। तीर्थंप्राप्यानुषंगेनस्नानंतीर्थेसमाचरेत्। स्नानजंफलमाप्नोति तीर्थयात्राफलंनतु। तथायस्यहस्तौचपादौच मनश्चैवसुसंयतं। विद्यातपश्च कीर्त्तिश्चस
तीर्थफलमश्नुते। नृणांपापकृतांतीर्थे भवेत्पापस्यसंक्षयः। यथोक्तफलदंतीर्थंभवेच्छुद्धात्मनांनृणां। हस्तसंयमोऽत्र निंदितप्रतिग्रहादिनिवृत्तिः। पादसंयमस्त्वगम्यदे
शगमननिवृत्तिः। मनःसंयमश्च काम क्रोधादिनिवृत्तिः विद्यात्र तीर्थफलबोधकसच्छास्त्रवेदाद्यधिगमरूपा तप आमिषादिनिवृत्तिः। तीर्थफलं सम्यगितिशेषः।
एतच्च हस्तसंयमादितीर्थयात्रांग महाभारते। तीर्थयात्रामुपक्रम्याभिधानात्। अतएव पैठीनसिः। षोडशांशंसलभते यः परान्नेनगच्छति। अर्द्धंतीर्थफलंतस्य यः प्रसं
गेनगच्छति। परान्नेनवेतनादिनाप्रसंगेन उद्देश्यांतरप्रसंगेन तथा प्रतिकृतिं कुशमयीं तीर्थवारिणि मज्जयेत्। मज्जयेत्तमुद्दिश्य अष्टभागंलभेतसः। प्रतिकृतिः प्रतिनिधि

स्नदर्भैर्वद्धः। शांतिदीपिकायां सप्तभिर्नवभिर्वापि सार्द्धद्वितीयवेष्टितं ओंकारेणैव मंत्रेण द्विजः कुर्य्यात्कुशद्विजं। नवभिरित्यत्र पंचभिरिति पाठः कर्म्मोपदेशिन्यां रत्नाकरेतु ग्रन्थप
रिशिष्टं। ऊर्द्धकेशो भवेद्ब्रह्मा लंबकेशस्तु विष्टरः। दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः। केशोह्यत्राग्रं तन्मज्जने मंत्रः। कुशोसि कुशपत्रोसि ब्रह्मणा निर्मितः पुरा। त्वयि स्नाते
सच स्नातो यस्यार्थे ग्रंथिबंधनं। स्कांदे। स्नापयेत् स्निग्धमित्रादीन् ज्ञातींस्तीर्थे नरोत्तमः। अन्यथापहरंत्येते वरान्तीर्थभवं फलं। विष्णुः। स्वयमुद्दिश्य कर्त्तव्यं स्वार्थे तीर्थे नरोत्तमैः। अ
कतृणां हरंत्येते तीर्थे पूर्वं च यत्कृतं। नरोत्तमैः स्वयं स्वार्थमात्मीयार्थमुद्दिश्य तीर्थे कर्त्तव्यं एते आत्मीयाः। मदनपारिजाते मार्कंडेयपुराणे। मातरं पितरं जायां भ्रातरं सुहृदं गुरुं। यमु
द्दिश्य निमज्जेत अष्टभागं लभेत सः। अत्रिसंहितायामप्येतत्। निमज्जेत स्वयमिति शेषः। मत्स्यपुराणे। ऐश्वर्यलाभमाहात्म्याद्गच्छेद्यानेन यो नरः। निष्फलं तस्य तत्तीर्थं तस्माद्यानं
विवर्जयेत्। गंगावाक्यावल्यां। संवत्सरं द्विमासोनं पुनस्तीर्थं ब्रजेद्यदि। मुंडनं चोपवासं च ततो यत्नेन कारयेत्। एतेन दशमासाभ्यन्तरे पुनर्गमने मुंडनोपवासौ न कार्य्याविति सूचितं
एवं तीर्थप्राप्तिनिमित्तकश्राद्धमपि आकांक्षायास्तौल्यत्वात्। तदुक्तं भट्टपादैः। काकेभ्यो रक्षतामन्नमिति वाक्योपदेशतः। उपघातप्रधानत्वं श्वादिभ्यो न रक्ष्यते। तीर्थोपवासश्च
फलविशेषार्थः। तदर्थमभिगम्य व्रतोपवासनियमयुक्तस्याक्षतामन्नमिति वाक्योपदेशात्ः ह्यवगाहमानस्त्रिरात्रमुषित्वा सर्वपापैः प्रमुच्यते स्वास्तिमांश्च भवतीति देवलव-
चनादिति कल्पतरुः। स्कांदे। मुंडनं चोपवासश्च सर्वतीर्थेष्वयं विधिः। वर्जयित्वा गयां गंगां विशालां विरजां तथा। यत्तु गंगायां भास्करक्षेत्रे मातापित्रोर्मृते गुरौ। आधाने सोम
पाने च वपनं सप्तसु स्मृतमिति स्मृतिसमुच्चयलिखितवचनं। भास्करक्षेत्रं प्रयागः। अत्र पूर्ववचनं सामान्यतो गंगायां निषेधकं परवचनं तु प्रयागवच्छिन्नगंगाया विधायकमिति न

13 विरोधः। समस्त्वंतु गंगात्वभास्करक्षेत्रत्वभेदात्। अत्र सर्वतीर्थपदं भारतादिप्रसिद्धदेशविशेषतीर्थपरं शिष्टपरिग्रहणात्। प्रयागेऽकरणे दोषोपि न तथा च। गंगायां भास्करक्षेत्रे मुंडनं यो
न कारयेत्। स कोटिकुलसंयुक्त आकल्पं रौरवे वसेत्। अत्र गंगाप्रयागयोर्वैशिष्ट्यं स्फुटं। प्रयागे स्त्रीणामपि मुंडनं। ननु वक्ष्यमाणवचनाभ्यां केशानां द्व्यंगुलच्छेदनमात्रं केशमूलान्यु
पाश्रित्य सर्वपापानि देहिनां॥ तिष्ठंति तीर्थस्नानेन तस्मात्तान्यत्र वापयेदिति वचनात्। अत्र कारयेद्वापयेदिति वचनात्। वपनं कारयिष्येऽइति प्रयोगः। मुंडने फलमपि तथा च प्रयाग
मधिकृत्य। यमः। केशानां यावती संख्या छिन्नानां जाह्नवीजले। तावद्वर्षसहस्राणि स्वर्गलोके महीयते। यावंति नखलोमानि वायुना प्रेरितानि वै। पतन्ति जाह्नवीतोये नराणां पुराय
कर्मिणां। तावद्वर्षसहस्राणि स्वर्गलोके महीयते। सर्वतीर्थेष्वित्यत्र कर्मधारयः। न च प्रयागमधिकृत्य मत्स्यपुराणं। एवं कुरुष्व कौन्तेय सर्वतीर्थाभिषेचनं। यावज्जीवकृतं पापं त
त्क्षणादेव नश्यति। अत्र समस्त्यन्यपदार्थबहुव्रीहिदर्शनात् तत्रापि तथेति वाच्यं लक्षणाप्रसंगात् मत्स्यपुराणवचनेऽन्यथानुपपत्त्या तथा कल्प्यते बहुवचनानर्थक्यापत्तेश्च १२ प्रा
न च ग्रहं संमार्ष्टीतिवदुद्देश्यगतत्वेन बहुत्वसंख्याया अविवक्षितत्वमिति वाच्यं। अत्र मौण्ड्यश्मश्रु। प्रमाणान्तराप्राप्तत्वेनोद्देश्यत्वाभावात्। किन्तु पशुनायजेतेत्यत्र पशोरेकत्व
वत् बहुत्वस्य विधेयत्वमिति गयादिविशेषनिषेधानुपपत्तेश्च। न चायज्ञिया मासा इतिवत् अत्यन्तनिषेधार्थमिति वाच्यं। अत्र मौण्ड्यश्मश्रुर्भवतीति उपदेशेपि प्रतिनिधिनाभाव
प्राप्तेर्युक्तो निषेधः अत्र प्रयागे मुंडनं कुर्यादित्युक्ते गयादौ प्रशस्त्यभावात् कुतो निषेधः। सर्वतीर्थपदस्य तीर्थमात्रपरत्वे गयादौ प्रशस्तया निषेधः सूपपन्नः। सामान्यशास्त्रप्राप्त्युप
जीवित्वात् पर्युदासत्रवतत्वे। न च गंगायां भास्करक्षेत्रे पित्रोश्च मरणं विना। इत्याछिन्ननियः केशान तमाहुर्ब्रह्मघातकमिति कालिकापुराणवाक्याद्न्यत्र निषेध इति वाच्यं। पूर्वो

क्तसमुच्चयवचनेनास्योपलक्षणत्वात्तथा च प्राधानसोमपानवत् सर्वतीर्थानां ग्रहणं। विष्णुनापि। प्रयागे तीर्थयात्रायां पितृमातृवियोगतः। कचानां वपनं कार्य्यं वृथा न वि
कचो भवेत् इत्यत्र तीर्थयात्रायामित्यधिकमुक्तं ततश्च प्रयागे अवश्यमुंडनं अन्यतीर्थेषु गयागंगाविशालाविरजेतरेषु मुंडने उपवासवत् फलाधिक्यं। कूर्म्मपुराणे। गंगा
यां स्नानतोऽन्त्यामुक्तिमाप्नोति पूरुषः। अस्नानाद्ब्रह्मलोकं च याति नास्त्यत्र संशयः। तथा गंगायां च जले मोक्षो वाराणस्यां जले स्थले। अंतरीक्षे च गंगायां गंगासागरसंगमे ।
चकारात्स्थलेपि स्मृतिः। अर्द्धं नारायणक्षेत्रे अर्द्धं कारणवारिणि। शुक्लपक्षे दिवा भूमौ गंगायामुत्तरायणे। धन्या देहं विमुंचंति हृदयस्थे जनार्द्दने। आग्नेये। अर्द्धोदके तु जा
ह्नव्यां म्रियते नशने नयः। स याति न पुनर्जन्म ब्रह्मसायुज्यमेति च। अर्द्धोदकं चरणान्नाभि पर्य्यन्तं स्कांदे। गंगायां त्यजतः प्राणान् कथयामि वरानने। कर्णे तत्परमं ब्रह्म ददामि मा
मकं पदं। प्रागुक्तकूर्म्मपुराणात् गंगात्व स्नाने मुक्तिस्तदस्नाने ब्रह्मलोकगमनमिति ब्रह्मांड। स्नानं तु भक्त्या गंगायां कर्तुकामस्य गच्छतः। पदे पदे श्वमेधस्य फलं मर्त्यस्य जायते
ब्रह्मांडाग्नेययोः। दृष्टात्तु हरते पापं स्पृष्टात्तु त्रिदिवं नयेत्। प्रसंगेनापि या गंगा मोक्षदा त्ववगाहिता। ब्रह्मांडे। अनेकजन्मसंभूतं पापं पुंसां प्रणश्यति। स्नानमात्रेण गंगायां सद्यः
स्यात्पुण्यभाजनं । अन्यस्थाने कृतं पापं गंगातीरे विनश्यति। गंगातीरे कृतं पापं गंगास्नानाद्विनश्यति। ब्रह्मांडपुराणे। वन्ध्यादौ कृष्णपक्षे तु भूमौ सन्निहिता भवेत्। यावत्पुण्यम
मावास्यां दिनानि दश नित्यशः। गंगेति शेषः। तेनात्राधिकं फलमित्यर्थः। भविष्ये। कृते तु सर्वतीर्थानि त्रेतायां पुष्करं परं। द्वापरे तु कुरुक्षेत्रं कलौ गंगा विशिष्यते। ब्रह्मपुराणे।
कलौ तु सर्वतीर्थानि स्वं स्वं वीर्य्यं स्वभावतः। गंगायां परिहंचन्ति सा तु देवी न कुत्रचित्। भविष्ये। द्वादश्यां श्रवणर्क्षे तु अष्टम्यां पुष्ययोगतः। आर्द्रायां च चतुर्दश्यां गंगास्नानं

14 सुदुर्लभं। तथा। कृष्णाष्टम्यां सहस्रन्तु शतं स्यात् सर्वपर्वसु। अमावास्यां शतगुणं सहस्रन्तु दिनक्षये। शतगुणं पर्वत्वेन प्राग्युक्तं शतं शतगुणं अयुतगुणमित्यर्थः। अन्यथा पर्वत्वेन
शतगुणं वैयर्थ्यं स्यात्। तथा संवत्सरं फलं तस्य नवम्यां कार्त्तिके तथा। मन्वादौ च युगादौ च मासत्रयफलं लभेत्। नैरन्तर्येण गंगायां मासं यः स्नाति मानवः। शक्रलोके सुचिरं कालस्थि
त्वा सगोत्रजैः। ततो ब्रह्मपुरे तिष्ठेत् कल्पकोटिशतायुतं। तथा। षण्मासं स्नाति गंगायां नैरन्तर्येण यो नरः। सर्वपापविनिर्मुक्तः समस्तकुलसंयुतः। समस्तभोगसंयुक्तो विष्णुलो
के महीयते। परार्द्धद्वितयं यावत् नात्र कार्य्या विचारणा। षण्मासमेकं त्वपरं सहृदेवो न्नरायणो। एतदेव भवेत् पुण्यं विषुवे च तथैव च। ब्रह्माण्डे। संक्रान्तिषु व्यतीपाते ग्रहणे चन्द्र
सूर्ययोः। पुष्ये स्नात्वा तु गंगायां कुलकोटीः समुद्धरेत्। व्यतीपातमाह बृहन्मनुः। श्रवणाश्विधनिष्ठाद्रा नागदैवतमस्तके। यद्यमा रविवारेण व्यतीपातः स उच्यते। नागदैवतम
श्लेषा मस्तकं मृगशिरः। गंगामृतग्रंथे भविष्यपुराणं। चतुर्द्दश्यां यदा योगो व्यतीपातेन चार्द्रया। तदा पुण्यतमः कालो देवानामपि दुर्लभः। तदा यः स्नाति गंगायां सोपि तत्फल १४ प्रा
माप्नुयात्। यच्चतत्र विपन्नो हि गंगामरणजं तु सः। व्यतीपातेन चन्द्रमा इति। गंगावाक्यावल्युक्तपाठेनान्वितत्वाद्धेयः। तथा आत्मनो जन्मनक्षत्रे जाह्नवीं गंगते दिने नरः स्नात्वा तु
गंगायां कुलकोटीः समुद्धरेत्। नक्षत्रवैधे मार्कंडेयः। तन्नक्षत्रमहोरात्रं यस्मिन्नस्तंगतो रविः। यस्मिन्नुदेति सविता तन्नक्षत्रं दिनं स्मृतं। पूर्वार्द्धमुपवासनक्तव्रतैकभक्तेषु
तत्रैवोपवसेदृक्षे यन्निशीथादधो भवेत्। उपवासे यदृक्षं स्यात् तद्दिनं नैकभक्तयोरिति। स्कंदपुराणात्। उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः। यत्र वा युज्यते राम निशी-
थे शशिना सहेति। विष्णुधर्म्मोत्तराच। यस्मिन्नुदेतीति तु परिशेषात् स्नानादाविति। गंगामत्यावतरणदिनमाहादिपुराणं। वैशाखे शुक्लपक्षे तु तृतीयायां जनार्द्दनः। यवानुत्पाद

यामासप्युगं चारध्यवानकृतं । ब्रह्मलोकात्रिपथगां पृथिव्यामवतारयत् । तस्यां कार्य्यो पर्वैर्हि नोपर्वैर्विस्तुंसमर्चयेत् । यवान्दद्यात् द्विजातिभ्यः प्रयतः प्राशयेद्यवान् । पूजयेद्धंकारंगं
गां कैलासं च हिमालयं । भगीरथं च नृपतिं सागराणां सुखावहं । सागराणां सगरवंशप्रभवानां । स्नानं दानं तपः श्राद्धं जपहोमादिकं च यत् । श्राद्धया क्रियते तत्तदानन्त्याय कल्प
ते । नन्दास्नानमधिकृत्यम विष्ये । सप्तजन्मसु यद्भुक्तं पतितान्नन्तु तैः सह । संसर्गश्च कृतः पंचपातकानि महान्ति च । तथानिर्वचनीयानि पापानि क्षयतां ययुः । रजस्वलायाः स्पृष्टा
न्न भोजनेनापि यद्भवेत् । सतता सत्य भाषेणास्तुवर्णीहरणेन च । माणाश्चापि चरत्न स्य सामान्यस कलस्य च वस्तुनश्चापि हरणो वधैः सखुर्द्विजातयः । मित्रहिंसा विप्रहिंसा मातृहिं
सादिभिश्च यत् जनितानि महान्तीह रौरवादीनि यानि च । तेष्वनवरतं विप्रास्ताडनं तु निवारयेत् । यमस्य किंकराणां वै पापमाजन्मयत्कृतं । बाल्ययौवन वार्द्धक्यदशापाप
क्षयोभवेत् । ब्रह्मापुरे वसहृष्टा हंसैतु परमं ततः । धेनूनां कपिलानां च लक्षं दत्वा द्विजातये । चतुर्वेदधात कायय तत्फलं लभते नरः । श्रीमन्नारायणस्येह दक्षिणे वसते भुजे
मर्त्यलोके ततोजन्म गुणानामाश्रयोभवेत् । भुंक्तेसर्वसुखं भोगं यशः प्राप्नोतिमानवः । गंगास्नानेननंदायां नात्र कार्य्याविचारणाः ॥ तदयं प्रयोगः ॥ ॐ अद्येत्यादि सप्तज
न्मवच्छिन्न पतितान्नभक्षणपतितसंसर्गीकृत पंचमहापातकानिर्वचनीयपापक्षयरजस्वलास्पृष्टान्नभक्षणसततासत्यभाषणास्तुवर्णीमणिरत्नापहरणसामान्यसकल
वस्त्वपहरणसविविध मित्रहिंसाविप्रहिंसामातृहिंसादिजनितमहारौरवाद्यनवरतयमकिंकरताडननिवारणाजन्मकृतबाल्ययौवनवार्द्धक्यदशापापक्षयब्रह्मलोकाधि
करणकपरमहंसदर्शनपूर्वकवासाधीतचतुर्वेदब्राह्मणसंप्रदानककपिललक्षधेनुदानजन्यफलसमफलश्रीमन्नारायणदक्षिणभुजवासतदुत्तरमर्त्यलोकीयजन्मगुणाश्र

15 यत्र सर्वसुखभोगयशःप्राप्तिकामो गंगायां नंद्यां स्नानमहं करिष्ये। गंगायां रजोयोगे प्रतिप्रसवमाह छंदोगपरिशिष्टं। यथ्यद्वयं श्रावणादि सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वीत
वर्जयित्वा समुद्रगाः। यत्तु आदौ कर्कटके देवी त्र्यहं यावद्रजस्वला। चतुर्थेऽहनि संप्राप्ते शुद्धा भवति जाह्नवीति। तद्रजोयोगमात्रं बोधयति न तु स्नानादिनिषेधः। अत एव निगमः। गंगा
धर्मद्रवी पुण्या यमुना च सरस्वती। अंतर्गतरजोयोगे सर्वाह्नःस्वेव निर्मलाः। आह्निकरजोदोषस्तु नीराजनाद्यर्थ इति शंखधर इति कृत्यतत्त्वार्णवः। दानधर्मे ब्रह्मांडाग्नेयेषु। गंगाती
रसमुद्भूतां मृदं मूर्ध्नि बिभर्त्ति यः। बिभर्त्ति रूपं सोऽर्कस्य तमोनाशाय केवलं। गंगामधिकृत्य वराहे। ब्रह्महा गुरुहा गोघ्नः स्पृष्टो वा सर्वपातकैः। तस्यास्तोये नरः स्नात्वा सर्वपापैः प्रमुच्य
ते। ब्रह्मपुराणे। प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयं। तत्र नारायणः स्वामी नान्यस्वामी कदाचन। अत्र न प्रतिगृह्णीयात् प्राणैः कंठगतैरपि। अत्र साधारणत्वेन सारदातिल
को नौहस्तो ग्राह्यः। यथा। चतुर्विंशत्यंगुलाद्यं हस्तं तंत्रविदो विदुः। यवानामष्टभिःक्लृप्तं मानांगुलमितीरितं। प्रमाणं तु पार्श्वेन षड्यवाः पार्श्वसम्मताः॥ इति कात्यायन- १५ प्रा
वचनात्। अनयोर्व्यवस्थामाह कपिलपंचरात्रे। अष्टभिस्तैर्भवेज्ज्येष्ठं मध्यमं सप्तभिर्यवैः। कन्यसं षड्भिरुद्दिष्टमंगुलं मुनिसत्तम। कन्यसं कनिष्ठं तंडुलानाह कालिका
पुराणे। यवानां तंडुलैरेकमंगुलं चाष्टभिर्भवेत्। अदीर्घयोजितैर्हस्तश्चतुर्विंशतिरंगुलैः। दानधर्मे भाद्रकृष्णचतुर्दश्यां यावदाक्रमते जलं। तावद्गर्भं विजानीयात्तदूर्ध्वं
तीरमुच्यते। ब्रह्मपुराणे। सार्द्धहस्तशतं यावद्गर्भतस्तीरमुच्यते। गंगावाक्यावल्यां। गंगातीरे कृतं यत्तु कोटिकोटिगुणं भवेत्। स्कांदे। यज्ञो दानं तपो यज्ञं जप्यं श्राद्धं च सुरपूज
नं। गंगायां तु कृतं यत्नात् कोटिकोटिगुणं भवेत्। गंगायामिति तीरपरमिति। गंगावाक्यावलीपाद्मे। तीरे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्मस्य विक्रयः। स्कांदे। तीरादाद्यूतिमात्रं तु-

पतिः क्षेत्रमुच्यते। अत्र स्नानं जपो होमो गंगायां नात्र संशयः। अत्र स्थास्त्रि दिवं यान्ति ये मृतास्ते पुनर्भवाः। गव्यूतिः क्रोशयुग्मं। नश्मशानं न चादेशो गंगायां परिकीर्त्यते। तीर्थचि-
न्तामणौ ब्रह्मपुराणे। अत्र दूरे समीपे वा सहस्रं योजनद्वयं। गंगायां मरणे नेह नात्र कार्या विचारणा। भविष्ये। सुलभं सकलं पुण्यं यज्ञदानादिकं फलं। गंगातोये श्चसतिलैर्दुर्लभं
पितृतर्पणं। अत्र निषिद्धदिनेपि तिलतर्पणं। यथा स्मृतिः। तीर्थे तिथिविशेषे च गंगायां प्रेतपक्षके। निषिद्धेपि दिने कुर्य्यात् तर्पणं तिलमिश्रितं। निषिद्धदिनान्याह रविशुक्रदिने
चैव द्वादश्यां श्राद्धवासरे। सप्तम्यां जन्मदिवसे न कुर्य्यात् तिलतर्पणं। सप्तम्यां निशि संक्रान्त्यां रविशुक्रदिने तथा। श्राद्धे जन्मदिने चैव न कुर्य्यात्तिलतर्पणं। श्राद्धपदम् नामावास्या-
श्राद्धेतरपरं। नीलषंडविमोक्षेण अमावस्यां तिलोदकैः। वर्षासु दीपदानेन पितृणां मरणं भवेत्। इति वचनात्। तीर्थेतरत्र प्रतिप्रसवमाह स्मृतिः। अयने विशुवे चैव संक्रान्त्यां
ग्रहणेषु च। उपाकर्म्मणि चोत्सर्गे युगादौ मृतवासरे। सूर्य्यशुक्रादिवारे च न दोषस्तिलतर्पणे इति। एवं भविष्ये। सतिलं गंगांतो यस्य दुर्लभत्वाभिधानात् न तीर्थे तिलाभावेपि
प्रतिनिधिना तर्पणं सूचितं प्रतिनिधिमाह। तिलानामप्यभावे तु सुवर्णरजतान्वितं। तदभावे निषिंचेयुर्दर्भैर्मन्त्रेण चाप्यथ। इति सामान्यतो योगियाज्ञवल्क्येनाभिधाना-
त्। सुवर्णरजतान्वितं सुवर्णरजतस्पृष्टजलं। यातु तीर्थमात्रे तु कर्त्तव्यं सतिलेनैव तर्पणं। योन्यथा तर्पयेन्मूढः स विष्ठायां कृमिर्भवेत्। इति स्कन्दपुराणोक्ता तीर्थे तिलरहि-
ततर्पणनिंदा सापि सप्तम्यादिनिषिद्धतिलतर्पणस्य तीर्थे तिथिविशेषे चेत्यनेन प्राप्तप्रतिप्रसवपरा सुवर्णादिप्रतिनिधिरहितपरा च। अन्यथा तिलाभावे प्रधानस्य तर्पणस्य
बाधः वचनप्राप्तस्य प्रतिनिधेर्वा बाधश्च तीर्थे स्यात् ततश्च वचनान्तर प्राप्तप्रतिप्रसवेनोपपत्तौ बाधद्वयकल्पनापत्त्या अन्याय्यत्वात्। नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमिष्य-

16 ते। तर्पणं तु भवेत्तस्य अंगत्वेन व्यवस्थितं इति जाबालोक्तात् स्नानांगतर्पणात् यथा तर्पणं तु शुचिः कुर्यात् प्रत्यहं स्नातको द्विज। इति योगियाज्ञवल्क्योक्तस्य पितृयज्ञस्तु त
र्पणमिति छंदोगपरिशिष्टोक्तस्य च प्रधानतर्पणस्यापि सिद्धिः। तथा च गंगादिकाम्यतर्पणं सिद्ध्यति। कामनावतः प्रधाननिराहस्या विशेषात्। एतेन गंगावाक्यावन्युक्तं पृथक्त
र्पणं निरस्तं। भविष्ये। गयाश्राद्धं कृतं तेन उत्सृष्टश्च वृषस्तथा। येन तद्दीचिसंसिक्ते तीरेश्राद्धमकारि च। ब्राह्मे। सर्वाणि येषां गांगेयैस्तोयैः कृत्यानि देहिनां। देहं त्यक्त्वा नराः
शैवे पदे तिष्ठन्ति सर्वदा। तथान त्याग तज्जलं पंकाशी तज्जलं सेवते तु यः। अनायासेन हि नरो मोक्षोपायं स विंदति। स्कांदे। गंगातीरं परित्यज्य अन्यतीर्थाभिलाषिणः। ब्रह्मह
त्याफलं तेषां सततं संशयात्मनां। स्मृतिः। यष्टिविघ्नसहस्राणि गंगा रक्षन्ति सेवितः। निवारयन्त्यभक्तांश्च पापकर्मरतांस्तथा। महाभारते। प्रद्युम्ननगराद्याम्ये सरस्वत्यास्त
थोत्तरे। तद्दक्षिणप्रयागस्तु गंगातो यमुनागता। स्नात्वा तत्राक्षयं पुण्यं प्रयाग इव लभ्यते। दक्षिणप्रयाग इति उन्मुक्तवेणीस प्रग्रामाख्य दक्षिणदेशे। स्कांदे। गंडूषमात्रपा १६ प्रा
नेन अश्वमेधफलं लभेत्। स्वच्छंदश्च पिबेदापस्तस्य मुक्तिः करे स्थिता। भविष्ये। यत्फलं जायते पुंसां दर्शने परमात्मनः। तद्भवेद्दर गंगाया दर्शने भक्तिभारतः। तथा गं
गाद्वारे प्रयागे च गंगासागरसंगमे। स्नात्वैव ब्रह्मणो विष्णोः शिवस्य च पुरं व्रजेत्। त्रिभिः सारस्वतं तोयं सप्तभिस्त्वथ यामुनं। नार्मदं दशभिर्मासैर्गांगं मासेन जीर्यति।
नाभ्यन्तर्गतयोयानां मृतानां क्वापि देहिनां। तत्तत्तीर्थफलावाप्तिर्नात्र कार्या विचारणा। यमः। क्षेत्रस्थमुद्धृतं वापि शीतमुष्णमथापि वा। गांगेयं हरते तोयं पापमा
मरणान्तिकं। भविष्य। अस्तु नारायणं देवं स्नानकाले स्मरेत्सदा। साक्षात् ब्रह्मस्वरूपिणां गंगायां च विशेषतः। गंगायां मौषलं स्नानं महापातकनाशनं। तस्यां

स्नानमंत्रो विधाकरलिखितो। विष्णुपादार्घ्यसंभूते गंगे त्रिपथगामिनि। धर्मद्रवीति विख्याते पापं मे हर जाह्नवि। श्रद्धया भक्तिसंपन्ने श्रीमातर्देवि जाह्नवि। अमृतेना
म्बुना देवि भागीरथि पुनीहि मां। तत्र ब्रह्मक्षत्रविशां चैव मंत्रवत् स्नानमिष्यते। तूष्णीमेव हि शूद्रस्य सनमस्कारकं स्मृतं। इति योगियाज्ञवल्क्योक्तस्यापवाधः। तथा चामंत्र
कमेव शूद्रः स्नायात्। इति गंगासागरसंगमे मंत्रः। त्वं देव सरितां नाथ त्वं देवि सरितां वरे। उभयोः संगमे स्नात्वा मुंचामि दुरितानि वै। आग्नेये पूजितायां तु गंगायां पूजिताः सर्वदेव
ताः। तस्मात्सर्वप्रयत्नेन पूजयेदमरापगां। ध्यानं यथा। चतुर्भुजां त्रिनेत्रां च सर्वावयवभूषितां। रत्नकुंभसितांभोजवरदाभयप्रदां। श्वेतवस्त्रपरीधानां मुक्तामणिविभूषितां।
ततो ध्यायेत्स्वरूपां च चंद्रायुतसमप्रभां। चामरैर्वीज्यमानान्तु श्वेतच्छत्रोपशोभितां। सुप्रसन्नां सुवदनां करुणार्द्रनिजांतरां। सुधाप्लावितभूमिष्ठां सागन्धानुलेपनां।
त्रैलोक्यललितां गंगां देवादिभिरभिष्टुतां। दिव्यरूपविभूषां च दिव्यमाल्यानुलेपनां। पूजामंत्रो भविष्ये। ॐ गां गंगायै विश्वमुख्यायै शिवामृतायै शान्तिप्रदायिन्यै ना
रायण्यै नमः। तथा। ॐ गंगायै नारायण्यै शिवायै नमो नम इति मंत्रेणाशततं शतमष्टोत्तरं जपेत्। तथा वासो हिरण्यरत्नानि पत्रपुष्पफलानि च। अन्नपानादिकं चापि यस्य
न यद्ददाति प्रियं। तत्तद्भक्त्यैव गंगायै यः प्रयच्छति मानवः। तत्तत्सुखमनन्तं हि संप्राप्येह च जन्मनि। प्रेत्य चाप्नोति निर्वाणं परमं यन्निरंजनं। देवसंप्रदानकदानेपि ब्राह्म-
णायैव दक्षिणा देया। तस्मात्सर्वात्मना पात्रे दद्यात् कनकदक्षिणामिति नंदिपुराणादिति गंगावाक्यावली। वस्तुतस्तु देवस्यापि पात्रत्वात्तस्मै दक्षिणा देया। तथा च भ
विष्ये। सर्वेषामेव पात्राणां परं पात्रं महेश्वरः। पतन्तं त्रायते यस्मादतीव नरकार्णवात्। महेश्वर इति प्रदर्शनं हेतोरविशेषात्। तथा च नंदिपुराणे। पात्राण्याध्यात्मिका मु-

17 ख्याविशत्यश्वाग्निहोत्रिणः। देवताश्च तथा मुख्या गोदानं त्वेतदुत्तमं। शान्तानिकादीनुपकम्य एतेभ्योपि द्विजाग्र्येभ्यो देयं सन्नं सदक्षिणमिति मनुवचने यस्मै दानं तस्मै दक्षिणेति दर्भ
नाव। व्यक्तं मत्स्यसूक्ते। देवेदत्वा तु दानानि देवे दद्याच्च दक्षिणां। तत्सर्वं ब्राह्मणे दद्यादन्यथा निष्फलं भवेत्। दत्वा त्वित्यत्र देयानीति वाराहितं त्रेपाठः॥ भविष्ये। सर्वतत्वम
यीं गंगां परमात्मस्वरूपिणीं। त्रैलोक्यपावनार्थाय गांगतां प्रणमेत्सदा। भविष्ये। यथा गौरी तथा गंगा तस्माद्गौर्य्यास्तु पूजने। विधिर्योभिमतः सम्यक् सोपि गंगाप्रपूजने। अतए
द्वागादिवलिधानसमाचारः। आदिपुराणे भागीरथी यत्र यत्रास्ति तीर्थे कुलद्वये चापि तथा विपन्नः। तदात तदा तत्र तस्याथ भक्त्या भावेन चास्थीनि विनिक्षिपेच्च। स्नात्वा ततः पंचग
व्येन सिक्त्वा हिरण्यमध्वाज्यतिलैश्च योज्य। ततश्च मृत्पुटे निधाय पश्यन् दिशं प्रेतगणोपगूढां। ॐ नमोस्तु धर्माय वदन् प्रविश्य जलं स मे प्रीत इति क्षिपेच्च। उत्थाय भास्वन्त १७ प्रा
मवेक्ष्य सूर्यं सदक्षिणां विप्रमुखाय दद्यात्। एतदर्थं तीर्थचिन्तामणावन्यथा पठितं। तद्यथा। स्नात्वा तथा तीर्य्ये च भास्करं च दृष्ट्वा प्रदद्यादथ दक्षिणां त्विति। एवं कृते प्रेत
पुरे स्थितस्य स्वर्गे गतिः स्याच्च महेंद्रतुल्या। प्रेतगणोपगूढां दक्षिणां दिशं। ॐ नमोस्तु धर्माय इति जलप्रवेश मंत्रः स मे प्रीतो भवत्विति अस्थिप्रक्षेप मंत्र इत्यनिरुद्धभट्टः।
अत्र प्रागुक्तविष्णुपुराणीये ऽप्रेतप्राणस्येत्यभिधानात्। मृतस्यैवास्थि गंगासंबंधे पुण्यजनकं। तेन जीवतोपि दन्तास्थिस्यापतते पश्चात् गंगासंबधायेत्याचारः। तत्र क्रमः। स्नात्वाच
म्याप सर्वांच कृत्वा पंचगव्यं हुत्वा अस्थीनि पंचगव्येन सिक्त्वा हिरण्यमध्वाज्यतिलैश्च संयोज्य मृत्तिकापुटे स्थापयित्वा दक्षिणाहस्तेन तत्पुटकमादाय दक्षिणां दिशं पश्यन्
नमोस्तु धर्माय इति वदन् जलं प्रविश्य ॐ स मे प्रीतो भवत्विति त्वा अस्थि प्रक्षिपेत्। ततो मज्जनं कृत्वा उत्थाय सूर्यं दृष्ट्वा दक्षिणामुत्सृजेत्। आदित्यपुराणे। मातुः कुलं पितृकुलं

वर्जयित्वा नराधमः। अस्थीन्यन्यकुलोत्थस्य नीत्वा चांद्रायणाच्छुचिः। एतत्तु धनग्रहणादिना। अस्थीनि मातापितृपूर्वजानां नयंति गंगामपि ये कदाचित्। सद्भावकस्यापि दयाभिभू
तास्तेषां तु तीर्थानि फलप्रदानि। इत्यादित्यपुराणे। सद्भावकस्य भावशुद्धस्य अन्यकुलजातस्यापि कृपातिशयादुर्म्मोद्धाऽस्थिप्रक्षेपे पुण्यातिशयाभिधानात्। कौर्म्मे। यावन्त्य
स्थीनि गंगायां तिष्ठन्ति पुरुषस्य च। तावद्वर्षसहस्राणि स्वर्गलोके महीयते। एतद्वचनस्य भावः अस्थिमनुष्यस्य गंगातोयेषु तिष्ठन्तीति दानधर्म्मे पूर्वार्द्धे पाठां नरात् कालस्यापि याव
त्वं प्रतीयते। यमः। दशाहाभ्यन्तरे यस्य गंगातोयेऽस्थि मज्जति। गंगायां मरणं याहक्तादृक्फलमवाप्नुयात्। मिताक्षरायां स्मृतिः। आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया। तेषामपि
तथा गंगातोयेसंस्थापनं हितं। भविष्ये। सर्वदेवमयी गंगा सर्वतीर्थमयी तथा। तथा। सर्वानंदप्रदायिन्यां गंगायां यो नरो नमः। अष्टाक्षरं जपेन्नित्यं मुक्तिस्तस्य करे स्थिता। नमो नारा
यणायेति प्रणवाद्यष्टवर्णकः। स्कांदमात्स्ययोः। क्रोधलोभैकद्दष्टीनां विपरीतक्रियावतां। कामिनां च तथान्यत्र तपो यज्ञादि निष्फलं। गंगायां तत् कृतं सर्वं सफलं नात्र संशयः। परं
ब्रह्मस्वरूपिण्या गंगाया स्तु स्वभावतः। ब्रह्मांडे। सर्वभावविशुद्धोपि गंगायां कुरुते तु यत्। संपूर्णं फलमाप्नोति हेलया तस्य कर्म्मणः। पापिनां पापहंत्रीत्वं स्वर्गमोक्षाप्तिहेतुता।
स्वभाव एव गंगायां सत्यं हि मरुचो यथा। अन्यत्र तु शंखः। अश्रद्दधानः पापात्मा नास्तिकोच्छिन्नसंशयः। हेतुनिष्ठश्च पंचैते न तीर्थफलभागिनः। आच्छिन्नसंशयः फलोपायेति कर्त्त
व्यता निश्चयशून्यः। पुलस्त्यः। कर्पटेनापि गंगायां स्नानदानादि कर्म्म च। यो लोभख्यातिपूज्यार्थं कुर्यात् सापि दिवं व्रजेत्। भविष्ये। चंद्रसूर्य्यग्रहे चैव मृतानां पिंडकर्म्मणि। महा
तीर्थे तु संप्राप्ते स्पृष्टदोषो न विद्यते। अन्यत्र देवलः। सव्रणः सूतकी स्त्री च मत्तोन्मत्त रजस्वला। मृतवंध्युरमध्यस्थ वर्ज्या अस्पृष्टोस्वकालतः। इत्यनेन वर्ज्यतामाह अस्य चित्तमध्याह

18 दंतनखमसंहार्यं लेपंमन्येतदन्तवत्। नतत्रबहुशः कुर्य्याद्यत्नमुद्धरणेपुनः। भवेदशौचतस्यावैधाद्दृशोहते। रत्नाकरादयोप्येवं। ब्रह्मांडे। गंगांपुण्यजलांप्राप्यत्रयोदश विवर्जयेत्। शौ
चमाचमनंसेकंनिर्माल्यंमलघर्षणं। गात्रसंवाहनंक्रीडांप्रतिग्रहमथारतिं। अन्यतीर्थरतिंचैवअन्यतीर्थप्रशंसनं। वस्त्रत्यागमथाघातं संतारंचविशेषतः। अत्राचमनपदं मु
खशोधनाचमनपरं। गंगादीन्निःक्षिपेत्तूष्णीं ततआचमयेद्विजःइतिकात्यायनवचने। भुक्त्वाचामेद्यथोक्तेनविधानेनसमाहितः। शोधयेन्मुखहस्तौच मृदाद्भिर्घर्षणैरपि। इत्याचा
रमाधवीयधृतदेवलवचनेच। तथादर्शनात्। नतुकर्म्मांगाचमनादिपरं। तद्बाधेनचरितार्थत्वे तद्बाधायोगात्। वस्त्रत्यागमिति। जलेस्नानशाटीपरित्यागपरं। स्कांदे। नाभ्यंगितश्च
प्रविशेद्गंगायांनमलान्वितः। नजल्पन्नमृषावीक्षन् नवदन्नमृतंवचः। मृषावीक्षन्इतस्ततोवीक्ष्यमाणः। ब्राह्मे। स्नायीततैलवानविप्रस्तदभूमिमुपेयिवान्। तदेगात्रंप्रक्षा
ल्यस्नायादित्यर्थः। योगियाज्ञवल्क्यः। अग्राम्यास्त्यागताआपो नद्याःप्रथमवेगिताः। प्रक्षोभिताश्चकेनापि याश्चतीर्थाद्विनिःसृता। इतितीर्थाद्विनिःसृतागंगादिप्रवाहाद्वि १८ प्रा
च्छिन्नाःप्रवाहमध्यविच्छेदेतु अन्तःशालीनप्रवाहिनीत्वाददोषः। अन्यथेदानीं गंगायाःसागरगामिनीत्वानुपपत्तेः। स्रवन्तीष्वनिरुद्धासुत्रयोवर्णाद्विजातयः। प्रातरुत्था
यकर्तव्यंदेवर्षिपितृतर्पणं। निरुद्धासुनकुर्वीरन्नंशभाक्तत्रशेतुहृत्। तस्मात्परकृतान्सेतून कूपांश्चपरिवर्जयेत्। उद्धृत्यवापित्रीनकुंडान कुर्य्याद्वापत्सुनोसदा।
इतिबौधायनवचने। निरुद्धायाअपिस्रवन्तीत्वश्रुतेः। सुतानामन्तःशालिलवाहिनीत्वं। योगियाज्ञवल्क्यः। तूष्णीमेवावगाहेत यदास्यादशुचिर्नरः। आचम्यप्रयतःपश्चा
त्स्नानंविधिसमाचरेत्। शुचिरपिक्रियांगस्नानेस्नातोधिकारीभवति। देवेपित्रेचकर्म्माणि इत्युपपत्तये। प्रांनिमज्जति क्रियांगस्नानस्य मज्जनमात्ररूपत्वात् वाहनाद्युपक्रम्य

वशिष्ठः। योनेनविधिनास्नातियत्रयत्रांभसिद्विजः। सतीर्थफलमाप्नोतितीर्थेतुद्विगुणंफलं। व्यासः। नाभेरूर्द्ध्वं हरेदाघुरधोनाभेस्तपःक्षयः। नाभेःसमजलंस्पृष्ट्वास्नानंतर्पणमाचरेत्। नाभिमात्र
जलेस्थित्वोत्तुपक्रम्यततस्त्रिरास्नुत्यइत्यत्रयद्यपिनाभिमात्रेजलेस्थितएवकर्म्मकर्त्तुं शक्नोतिनोपविष्टस्तथापिस्थित्वेत्युपादानं। वहूदकेएवनाभिमात्रनियमः। अल्पोदकेतूप
विष्टोपिएवमेंगानांवाधकंविनाप्रधानसमदेशत्वनियमात्संकल्पादिनैवैव। स्कांदे। वारुणेनसमायुक्तामधोकृष्णात्रयोदशी। गंगायांयदिलभ्येतसूर्य्यग्रहशतैःसमा। वारु-
णाशतभिषा। शनिवारसमायुक्तासामहावारुणीस्मृता। गंगायांयदिलभ्येतकोटिसूर्य्यग्रहैःसमा। शुभयोगेसमायुक्ताशनौशतभिषायदि। महामहेतिविख्यातात्रिकोटिकुलमु
द्धरेत्। ब्रह्मपुराणे। महाज्येष्ठ्यांतुयःपश्येत्पुरुषःपुरुषोत्तमं। विष्णुलोकेमवाप्नोतिमोक्षंगंगांवुमज्जनात्। ऐंद्रेगुरुःशशीचैवप्राजापत्येरविस्तथा। पूर्णिमागुरुवारेणमहाज्येष्ठी
प्रकीर्त्तिता॥ ऐन्द्रेज्यष्ठा। यांप्राजापत्येरोहिण्यांविनागुरुवारेणापि। ऐन्द्रेगुरुःशशीचैवप्राजापत्येरविस्तथा। पूर्णिमाज्येष्ठमासस्यमहाज्येष्ठीप्रकीर्त्तिता। अनुराधस्थगुरावपि। ऐन्द्रे
मैत्रेयदाजीवतत्स्थेचद्दशकेरविः। पूर्णिमांशक्रचन्द्रेणमहाज्येष्ठीप्रकीर्त्तिता। अनुराधास्थचन्द्रेपिव्याघ्रभूतिः। ऐन्द्रर्केप्यथवामैत्रेगुरुचंद्रौयदास्थितौ। पूर्णिमाज्येष्ठमासस्य
महाज्येष्ठीप्रकीर्त्तिता। राजमार्त्तण्डः। ज्येष्ठेसंवत्सरेचैवज्येष्ठमासस्यपूर्णिमा। ज्येष्ठाभेनसमायुक्तामहाज्येष्ठीप्रकीर्त्तिता। ज्येष्ठसंवत्सरश्च। ज्येष्ठमूलोपगेजीवेवर्षःस्याद्धक्त्रदे
वतः इतिविष्णुधर्म्मोत्तरोक्तोग्राह्यः। नतुसंवत्सरादिपंचकान्तर्गतवर्षविशेषः। ज्येष्ठइतिवर्षविशेषणास्यवैयर्थ्यापत्तेः संवत्सरेयदिस्यादितिपाठः कात्यनिकःप्रपंचस्तुम
लमासतत्त्वेअनुसंधेयः। वारुण्यादिषुपूर्णातिथौमध्याह्नादिसमयेनक्षत्रसत्वेपरदिनेपूर्वाह्णेतिथिनक्षत्रलाभेपिपूर्वदिनेएवस्नानंवच्छिदंडात्मिकायातिथिर्निष्क्रमणेनपरे। अकर्म्म
ण्यंतिथिमलंविद्यादेकादशींविना इतिस्मृतेः। नचकर्म्मणोयस्ययःकालस्तत्कालव्यापिनीतिथिः। तयाकर्म्माणिकुर्वीतह्रासवृद्धीनकारणमितिवृद्धयाज्ञवल्क्यवचनात्

19 मैत्रंप्रसाधनं स्नानं दन्तधावनमंजनं। पूर्वाह्न एव कुर्वीत देवतानां च पूजनमिति मनुवचनाच्च। कथं पूर्वदिन एवेति वाच्यं। दिवाकरकरैः पूतं दिवास्नानं प्रशस्यते। अप्रशस्तं निशि-
स्नानं राहोरन्यत्र दर्शनात् इति पराशरवचनेन दिनरात्र्योरेव स्नानांगत्वात् मनुवचने तु मैत्रादिपदसमभिव्याहारात् स्नानपदं प्रातःस्नानपरमेव इति कुल्लूकभट्टः मैत्रं पुरीषोत्सर्गः नि-
त्यदेवताकपायुसंवधात्। यत्तु वृहद्वशिष्ठः। अहन्येवाचरेत् स्नानं मध्याह्नप्राग्विशेषतः। इति तत्पूर्वाह्णविहिततिथ्यादिलाभे वोढव्यं। अहरित्युपादानात्। चांडालादिस्प-
र्शेपि न रोगिनः स्नानं स्पष्टमाह रत्नाकरे वृहस्पतिः। तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे। नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यते। आपद्यपि च कष्टायां रुग्भये पीडने स-
दा। मातापित्रोर्गुरोश्चैव निदेशेवर्त्तिनां तथा। उत सर्वेवास्तु देवस्य स्नायाद्योशुचिशंकया। तादृशं कल्मषं दृष्ट्वा सचेलो जलमाप्नुयात्। स्पृष्टास्पृष्टीत्यव्ययं क्रियाव्यतिहारे।
नथेति न दुष्यतीत्यर्थः। प्रत्युत गंगायामुत्तरोत्तरकालप्राशस्त्यमाह भविष्यपुराणं। प्रातःस्नानाद्दशगुणं पुण्यं मध्यदिने भवेत्। सायंकाले शतगुणमनन्तं शिवसन्निधावि- १८ प्रा
ति। प्रातर्निशि तथा संध्या मध्याह्नादिषु संस्मरन्। नारायणमवाप्नोति सद्यः पापक्षयं नरः। इति विष्णुपुराणोक्तवचनात्। न देशनियमस्तत्र न कालनियमस्तथा। नोत्शि-
ष्टादौ निषेधोस्ति हरेर्नामानि लुब्धक। इति संवत्सरप्रदीपोक्तावत् राहुदर्शनवत् रात्रावपि गंगायां प्रतिप्रसवमाह ब्रह्मांडपुराणं। दिवारात्रौ च संध्यायां गंगायां च विशेषतः।
स्नात्वाश्वमेधजं पुण्यं गृहेप्युद्धृत्य तज्जलैः। रात्रिंचराधिकारमुपक्रम्यादिपर्वणि गंधर्ववाक्यं अतो रात्रौ प्राप्नुवतो जलं ब्रह्मविदो जनाः। गर्हयन्ति जलानसर्वान् वनस्थानपतिरपि
तत्रार्जुनस्य प्रतिवचनं। समुद्रे हिमवत्पार्श्वे नद्यामस्यां च दुर्मते। रात्रावहनि संध्यायां कस्य गुप्तः परिग्रहः। असंबाधादेव नदी स्वर्गसंपादिनी शुभा। कथमिच्छसि तां रोद्धुं नैष धर्मः स

नातनः। अनिवार्यमसंबाधं तव वाचा कथं वयं। नस्पृशेम यथा कामं पुण्यं भागीरथीजलं। स्मृतिः। न मंत्रो न विधिश्चैव न मद्दो न च गोमयं। न कालनियमस्तत्र गंगां प्राप्य सरिद्वरां। भवि
ष्ये। सर्व एव शुभः कालः सर्वो देशस्तथा शुभः। सर्वो जनस्तथा पात्रं स्नानादौ जाह्नवीजले। गृहस्थरत्नाकरे देवलः। महानिशा तु विज्ञेया मध्यमं प्रहरद्वयं। तस्यां स्नानं न कुर्वीत काम्यनैमि
त्तिकादृते। अत एव कल्पतरुः। नक्तस्नायादिति बौधायनवचनं। रागप्राप्तस्नानमात्रविषयं अत एव नद्यः पुण्याः सदा प्रोक्ता जाह्नवी च विशेषतः। इति शंखवचनं। तद्धृतमपि संगच्छते।
इत्यतत्वार्णवे स्कंदपुराणे। विशेषतस्तु जाह्नव्यां सर्वदा तर्पयेत् पितॄन्। न कालनियमस्तत्र क्रियते सर्वकर्मसु। एवं च गंगास्नानदिवारात्रिकर्तव्यत्वाविशेषात्तन्निमित्ततिथिवि
शेषस्यापि दिनरात्रिसंबन्धित्वेनाविशेषः कालमाधवीयेपि विशेषवचनाभावे सामान्यस्य स्वीकर्तव्यत्वादित्युक्तं। तच्च कर्मणो यस्येति प्रागुक्तत्वात्। अहःसु तिथयः पुण्याः कर्मा
नुष्ठानतो दिवा। नक्तादिव्रतयोगे तु रात्रियोगा विशेष्यते। इति जाबालोक्तस्य दिवाविहितकर्मानुष्ठाने अहःसु तिथयः पुण्याः। नक्तादिव्रतयोगे रात्रिविहितकर्मणि रात्रिसंबन्धितिथयः पुण्या
इत्यर्थात्। न चैवं गंगायां रात्रौ तीर्थश्राद्धं स्यादिति वाच्यं तस्य तीर्थमात्रप्राप्तिनिमित्तकत्वात् गंगात्वेन निमित्तत्वाभिति। एतेन वारुण्यादौ महाफलश्रुते रात्रावपि गंगास्नानं कर्तव्यमिति ।
महाव्यामोऽत्र वतस्याराहुदर्शनादिप्रतिप्रसूतेतरसर्वत्र कर्मणिपर्युदस्तत्वादिति निरस्तं। स्नाने तु मुहूर्तोनतिथिर्न ग्राह्या यथा स्कंदपुराणे। व्रतोपवासस्नानादौ घटिकैका यदा भवे
त्। उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके। पद्मपुराणे। ग्राह्यत्यत्र तथेति पाठः। विष्णुधर्मोत्तरे। आच्छादावस्तगामिनीति चतुर्थचरणे पाठः। घटिकात्र मुहूर्तपरा पैतृक इत्यनुरोधात्
भोजदेवधृतं। चेत्कृष्णचतुर्दश्यामंगारकदिनं भवेत्। पिशाचत्वं पुनर्नस्याद् गंगायां स्नानभोजनात्। भविष्ये। माहात्म्यं ये च गंगायाः शृण्वन्ति च पठन्ति च। ते सर्वे महापापैर्मुच्यते ना।

२० त्रसंशयः॥ अथगोवधादौबालत्वादिना प्रायश्चित्तभेदः॥०॥ विश्वामित्र हृष्टांस्तु चतुरः कृष्यात्गोवधे बुद्धिपूर्वके। अमत्या च द्वयं कार्यं तदर्द्धं बालवृद्धयोः। स्त्रीशूद्रयोरेवमेतद्वधेचैव
नसंशयः। अत्रशूद्रकर्तृकगोवधे अर्द्धश्रुतेः। गोघ्नवद्विहितःकस्यश्चांद्रायणमथापिवा। अभ्यासेतुतयोर्भूयस्ततःशुद्धिमवाप्नुयात्। इत्यनेनउपपातकमात्रेगोवधधर्म्मातिदेशात्। तत्रशू
द्रस्यार्द्धमन्येषां वर्णानांसंपूर्णमिति। एवंचशूद्राणांतुसधर्म्मिणःसर्वेपध्वंशजाः स्मृताः। इतिमनूक्तेः। प्रतिलोमजानामप्यर्द्धं। यत्रैकस्यावृत्तेर्बालत्वं स्त्रीत्वंच तत्रयथाबालत्वादर्द्धं त
थास्त्रीत्वादर्द्धं। पादमात्रमितियावत्। यथामिताक्षरायां। अर्वाग्द्वादशवर्षीयादशीतेरूर्द्धमेवच। अर्द्धमेवभवेत्पुंसां तुरीयंतत्रयोषितां॥ यत्तआदिपर्वणि॥ अत्रचतुर्द्दशकाद्वर्षात् भ
विष्यतिनपातकं। परेणकुर्वतामेव भविष्यतीति तदत्यन्तसगुणवान्विषयमिति प्रायश्चित्तविवेकः। नचैवंतस्याशूद्रत्वात्तदर्द्धं इतिवाच्यं। अनुग्रहेपादमात्रावधेरुक्तत्वात्। य
थाहारीतः। यथावयोयथाकालं यथाप्राणांच ब्राह्मणे। प्रायश्चित्तंप्रदातव्यं ब्राह्मणैर्धर्म्मपाठकैः। वयोबाल्यादिकालोवसन्तादिः। प्राणं आशक्तत्वादि। तथा। यस्मात्कृच्छ्रमथाप्यर्द्धं २० प्रा
पादंवापिविधानतः। ज्ञात्वावयोवस्थाकालं प्रायश्चित्तंप्रकल्पयेत्। पादंवेतिपादमेवेत्यर्थः। बाल्यादिकस्योपनयोरेवार्थेच समुच्चये। इतिविश्वदर्शनात्। अतएवपादं वेति। ततोन्यून॰
प्रायश्चित्तंप्रकल्पयेदिति प्रायश्चित्तविवेकः। शास्त्रीयप्रायश्चित्तमुदाहृत्यपश्चादनुग्रहःकार्य्य इत्याहांगिराः। कृत्वापूर्वमुदाहारं यथोक्तंधर्म्मकर्तृभिः। पश्चात्कार्यानुसारेणश=
क्त्याकुर्वन्त्यनुग्रहं॥ ॥अथप्रायश्चित्तोपदेशादि॥ यमः। एकोद्वौवात्रयोवापियद्ब्रूयुर्धर्म्मपाठकाः। सधर्म्मइतिविज्ञेयोनेतरेषांसहस्रशः। धर्म्मःशास्त्रीयः। वृद्धशातातपः॥ अ
बुद्ध्वाधर्म्मशास्त्राणिप्रायश्चित्तंवदन्तिये। प्रायश्चित्तीभवेत्पूतस्तत्तेषुगच्छति। अतएवयमः॥ वेदाःप्रमाणंस्मृतयःप्रमाणंधर्म्मार्थयुक्तंवचनंप्रमाणं। यस्यप्रमाणंनभवेत्प्रमाणं क

स्तस्य कुर्य्याद्वचनं प्रमाणं।धर्म्मार्थयुक्तं मीमांसकसन्निवेंधवाक्यं पस्येति अनन्तरोक्तं प्रमाणत्रयं योऽनन्यतेइत्यर्थः।मनुरपि आर्षं धर्म्मोपदेशं च वेदशास्त्राविरोधिना।यस्तर्केणानुसंध
त्ते सधर्म्मं वेद नेतरः॥ ऋषिप्रुष्टत्वादार्षं वेदं धर्म्मोपदेशं तन्मूलं स्मृत्यादिकं।यस्तद्विरुद्धेन तर्केण मीमांसादिना अनुसंधत्ते विचारयति सधर्म्मं वेदजानाति न तु मीमांसानभिज्ञः।अ
त एव महर्षपादैरुक्तं।धर्म्मे प्रमीयमाने हि वेदेन करणात्मना।इतिकर्त्तव्यताभागं मीमांसा पूरयिष्यतीति।मीमांसा वेदविचारः।सा च कर्म्मब्रह्मभेदाज्जैमिनिवादरायणप्रणीता
द्विविधा अतएव बृहस्पतिः।केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः।युक्तिहीनविचारे तु धर्म्महानिः प्रजायते।वशिष्ठेपि।इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।बिभेत्यल्प
श्रुताद्वेदो मामयं प्रहरिष्यति।श्रुतमर्थावबोधकव्याकरणमीमांसादिशास्त्राण्यष्टादश।यथा विष्णुपुराणे। अंगानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।धर्म्मशास्त्रं पुराणं च विद्या
ह्येताश्चतुर्दश। आयुर्वेदो धनुर्वेदो गांधर्वश्चेति ते त्रयः।अर्थशास्त्रं चतुर्थं च विद्या अष्टादशैव ताः। चतुर्दशधर्म्मप्रमिति प्रधानाश्चतस्रः पुनर्द्दृष्टप्रधानाः क्वचिदलौकिकमर्थं प्र
मापयन्त्यो धर्म्मेपि प्रमाणं।अंगानि षडित्यष्टादश। प्रायश्चित्तं मनुपदेशे दोषमाहांगिराः। आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः।जानन्तो न प्रयच्छन्ति तेपि तद्दोषभा-
गिनः। प्रश्नादिकं विना वदतां दोषमाह। अनर्चितैरनाहूतैरपृष्टैश्चैव संसदि। प्रायश्चित्तं न वक्तव्यं जानद्भिरपि जल्पतः।स्पृष्टादेस्तु प्रायश्चित्तादेशे पुण्यमाह।स एव ।यत्पुण्य
मुद्धृते विप्रे म्रियमाने जलादिषु।तत्पुण्यं तारिते पापात् प्रायश्चित्तैस्तु मानवे। व्यवहारचिन्तामणौ ज्योतिषे। नाष्टम्यां न चतुर्दश्यां प्रायश्चित्तपरिक्षणं।न परिक्षा विवाहश्च शनिभौम
दिने तथा। विष्णुः।ब्राह्मणादिनामशौचे यः सकृदन्नमश्नाति तस्य तावदशौचं यावत्तेषामशौचापगमे प्रायश्चित्तं कुर्य्यादिति।अशौचापगमे प्रायश्चित्तविधानाद्दशौचाभ्यन्तरे प्रायश्चि

ख्या=२

२१ ज्ञानांनैमित्तिकानिकाम्यानि निपतन्तियथातथा। तथातथैवकार्य्याणि नकालस्तुविधीयते। इतिदक्षवचनेनापि न प्रतिप्रसवः। प्रायश्चित्तोपदेशग्रहणाय वस्त्रादिनाब्राह्मणस्तोषणीयः। यथा
मिताक्षरायां। पराशरः। पापंप्रख्यापयेत्पापीदत्वाधेनुंतथावृषं। एतच्चोपलक्षणं। प्रख्यापयन्पापंवक्तव्यः किंचिद्दत्वाव्रतंचरेदितिस्मृतेः। देवलः। तोषयित्वाद्विजोत्तमान्नित्यत्रतोषयित्वे
ति श्रवणादनेतिकरत्वेनतद्ग्रहणान्नदोषः। पापिभ्यःप्रतिग्रहएवदोषश्रुतेः। प्रतिग्रहस्त्वदृष्टार्थत्यक्तद्रव्यस्वीकारइतिप्रायश्चित्तविवेकः। अतएवप्रायश्चित्तद्रव्यग्रहणेपिदोषं
वदन्ति। क्षत्रियादिभ्यःप्रायश्चित्तोपदेशाब्राह्मणमन्तर्धायकरणीयः। यथांगिराः। न्यायतोमार्गमाणस्यक्षत्रियादेः प्रमाणिनः। अन्तरंब्राह्मणंकृत्वाव्रतमेतत्समादिशेत्। गोवधेगो
स्वामिनेगोमूल्यंदत्वाव्रतंकरणीयं। आदौगोपतयेदत्वागोमूल्यंसाधुकल्पितमिति ब्रह्मपुराणात्। नचैतद्ग्रहणेदोषः। गवांविक्रयकारीचगविरोमानियानिच। तावद्वर्षसहस्रा- २१ प्रा
णिगवांगोष्ठेकृमिर्भवेत्। इतियमवचनादितिवाच्यं। तद्ग्रहणस्यविक्रयत्वेनव्यवहाराभावात् प्रतिरूपकस्यानीयत्वाच्च। नहिप्रतिरूपग्रहणंविक्रयः। तथाचपराशरः। प्रमाप
णेप्राणभृतांदद्यात्प्रतिरूपकं। तस्यानुरूपंमूल्यंवादद्यादित्यब्रवीन्मनुः। प्रतिरूपकंतत्तुल्यंप्राण्यन्तरं। एवंचौरात्स्वामिनोवाक्रीतगवादिकंदत्वातन्मूल्यंगृह्णतोनविक्रियः।
किन्तूपाधिंविनायत्रस्वेच्छयालाभायवाविक्रीणीतेतत्रतथेति॥ ०॥ अथचौराद्दामविनिर्णयः॥ विक्रेतुर्दर्शनाच्छुद्धिःस्वामीद्रव्यंनृपोदमं। क्रेतामूल्यमवाप्नोति तस्माद्यस्त
स्यविक्रयी। क्रेतुश्चौरत्वेनाभिशस्तत्वेसतिविक्रेतुर्दर्शनाच्छुद्धिः। एतदप्रकाशक्रयेतथाचबृहस्पतिः। प्रकाशंवाक्रयंकुर्यान्मूलंवापिसमर्पयेत्। मूलंविक्रेतारं। यस्तस्यापह
तद्रव्यस्यविक्रयीचौरस्तस्मात्स्वामीनष्टधनःस्वं। नाष्टिकश्चैवकुरुतेतद्धनंतान्दमिःस्वकं। अदत्तत्यक्तविक्रीतंकृत्वास्वंलभतेधनीत्युक्तरीत्यास्वीयंद्रव्यंनृपश्चापराधानुरूपंदमं

धान्यं दशभ्यः कुंभेभ्यो हरतोऽभ्यधिकं वधः । इति मनूक्तादिदण्डं । क्रेता च मूल्यमवाप्नोति । कुंभपरिमाणं माह कात्यायनः । दश द्रोणा भवेत्खारी कुंभो पि द्रोणा विंशतिः । द्रोणाऽक्तोऽष्टतास्तया ।
अष्टमुष्टिर्भवेत्कुंचिः कुंचयोऽष्टौ च पुष्कलं । पुष्कलानि च चत्वारि आढकः परिकीर्त्तितः । चतुराढको भवेद्द्रोण इत्येतन्मानलक्षणं । कल्पतरौ तु । द्वादश प्रसृतिभिः कुडवस्तस्मादुत्त-
रोत्तरचतुर्गुणात् प्रस्थाढकद्रोणाः द्रोणस्य दशविंशतिगुणाभ्यां खारी कुंभावित्युक्तं । कुडवचतुर्गुणाद्दष्टचत्वारिंशता प्रसृतिभिः प्रस्थः । तच्चतुर्गुणात् द्विनवत्यधिकशतेन प्रसृतिभिराढकः
तच्चतुर्गुणादष्टषष्ट्यधिकसप्तशत्या प्रसृतिभिर्द्रोणः तद्दशगुणादशीत्यधिकषट्शत्यधिकसप्तसहस्र्या प्रसृतिभिः खारी । द्रोणविंशतिगुणात् षष्ट्यधिकत्रिंशत्यधिकपंचदशप्रसृतिभिः कुं-
भः । तेन षट्प्रसृतिभिः कुंचिः । प्रस्थपुष्कलयोः पर्यायता कुंचितण्डुलाश्च पुरुषाहारयोग्या इति । गोपथब्राह्मणं च । द्वात्रिंशत्पलिकं प्रस्थं स्वयमुक्तमथर्वणा । आढकस्तु चतुःप्रस्थै-
श्चतुर्भिर्द्रोण आढकैः । पलप्रमाणं तु वक्ष्यते प्रकाशक्रये तु स्वामिनो ग्रहणं नारदबृहस्पती । वणिग्वीथिपरिगतं विज्ञातं राजपुरुषैः । अविज्ञाताश्रयात्क्रीतं विक्रेता यदि वाऽऽहृतः ।
स्वामी दत्त्वार्द्धमूल्यं तत्प्रगृह्णीत स्वकं धनं । अर्द्धं द्वयोपहृतं तत्र स्याद्व्यवहारतः । अविज्ञातक्रये दोषस्तत्तश्चापरिपालनं । एतद्द्वयं समाख्यातं द्रव्यहानिकरं परं ॥ अथ क्रयनिर्ण-
यः । मूल्यं दास्यामीति कृत्वा ग्रहणादपि क्रयसिद्धिः । यथा विवादचिन्तामणौ कात्यायनः । पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत् । ऋतुत्रयस्योपरिष्टात्तद्धनं वृद्धिमाप्नुया-
त् । अत एव बृहस्पतिः । गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितं । पत्रं कारयते यत्तत्क्रयलेख्यं तदुच्यते । क्रीते तु समयविशेषाभ्यन्तरे पश्चात्तापादसिद्धिः ॥ तथा मनुः । क्रीत्वा वि-
क्रीय वा किंचिद्यस्येहानुशयो भवेत् । सोऽन्तर्दशाहे तद्द्रव्यं दद्याच्चैवाददीत वा । एतत् याज्ञवल्क्योक्तेतरपरं । यथा याज्ञवल्क्यः । दशैकपंचसप्ताहमासत्र्यहार्द्धमासिकं । बीजायोवा-

22 त्यरत्व स्त्रीदेहेपुंसां परिस्रवणं। अत्र बृहस्पतिः। अतो वीकपण्यदोषस्तु यदि संजायते क्वचित्। विक्रेतुः प्रतिदेयन्तत् क्रेता मूल्यमवाप्नुयात्। अतस्तद्द्रव्यपरीक्षणाकालात् देयमाह का
त्यायनः। अविज्ञातं तु यत् क्रीतं दुष्टं पश्चाद्विभावितं। क्रीतं तत्स्वामिना देयं पण्यं कालेन्यथा न तु। कालेप्राग्युक्तपरीक्षाकालाभ्यन्तरे। परीक्षिते तु बृहस्पतिः। परीक्षेत स्वयं पण्यम
न्येषां च प्रदर्शयेत्। परीक्षितं बहुमतं गृहीत्वा न पुनस्त्यजेत्। अत्र विशेषयति नारदः। क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीतं मन्यते क्रयी। विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाह्न्यविक्षितं। द्वितीये-
ह्निदद्यात् क्रेता मूल्यात् त्रिंशांशमाहरेत्। द्विगुणं तु तृतीयेह्नि परतः क्रेतुरेव तत्। आहरेद्दद्यात् विक्रेत्रे इति शेषः। द्विगुणं त्रिंशांशमस्येत्यर्थः। याज्ञवल्क्यः। राजदैवोपघातेन पण्ये दोषमु
पागते। हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः॥ नारदः। उपहन्येत वा पण्यं दह्यतापह्रियेत वा। विक्रेतुरेव सोनर्थो विक्रीयासंप्रयच्छतः। दीयमानं न गृह्णाति क्रीतं पण्यं तु यः क्रयी।
स एवास्य भवेद्दोषो विक्रेतुर्योप्रयच्छतः॥ ०॥ अथ प्रायश्चित्तपूर्वाहकृत्यं॥ शंखलिखितौ। वाप्य केशनखान् पूर्वं घृतं प्राश्य बहिर्निशि। प्रत्येकं नियतं कालमात्मनो व्रतमादिशे २२ प्रा
त्। प्रायश्चित्तमुपासीनो वाग्यतास्त्रिसवनं स्पृशेत्॥ घृतप्रशंसामाह मत्स्यपुराणं। यस्मात्तेजोमयं ब्रह्म घृते तच्च व्यवस्थितं। तेजोघृतमयं द्रव्यं महापातकनाशनं॥ बहिर्निशीति
परेणान्वयः। व्रतं निशामुखे ग्राह्यं बहिस्तारकदर्शने। इति लघुहारीतवाक्यैकवाक्यत्वात् प्रत्येकमित्यादि पूर्वं व्याख्यातं। केशधारणे छायां द्विगुणव्रतादिकमाह हारीतः। राजा
वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः। केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत्। केशानां धारणार्थन्तु द्विगुणं व्रतमाचरेत्। द्विगुणे तु व्रते चीर्णे द्विगुणा दक्षिणा भवेत्। विद्वद्विप्रा
दीनां तु महापातकादिदोषस्य मुंडनं। यथा। विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनं। ऋते महापातकिनो गोहंतुश्चावकीर्णिन इति मिताक्षराघृतदेवलवचनात्। हारीतेन प्राय

श्चित्तपूर्वाह्णे मुंडनविधानाद्धुनुदा वपितथा। स्त्रीणां विशेषमाह भवदेवभट्टधृतदवलवचनं। वपनं नैव नारीणां नानुव्रज्या जपादिकं। नगोष्ठे शयनं तासां नचदध्याज्ञ्वाजिनं। सर्वान्के
शानसमुद्धृत्य छेदयेदंगुलिद्वयं। सर्वत्रैवहिनारीणां शिरसो मुंडनं स्मृतं। पराशरस्यैतदिति मिताक्षरा। सर्वत्रेति प्रागुक्तमहापातकादिपरं। नतु प्रयागादिपरं। पादेंगनोमवपनं
द्विपदे श्मश्रु गोपि च। त्रिपादे तु शिखावर्जं सशिखं तु निपातने। इति वचनं तु प्राजापत्यादिविषयकमिति पश्चात् विचारयिष्यते॥ ॥ अथ वाल्यादिभेदात् प्रायश्चित्तं॥ ० ॥ तत्र ऊन
षोडशवर्षीयस्याह। अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः। प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिन एव च। इति विष्णुशातातपवचनात्। पादो बालेषु दातव्यः सर्वपापेस्वयं विधिः
इति लघुहारीतविष्णुवचनं तु ऊनैकादशवर्षपंचवर्षाधिकबालविषयं यथांगिराः। ऊनैकादशवर्षस्य पंचवर्षाधिकस्य च। चरेद्गुरुः सुहृद्वापि प्रायश्चित्तं विशुद्धये। ब्रह्मपु
राणे। रोगी हृष्टस्तु पौगंडः कुर्वन्त्यन्यैर्व्रतं सदा। दशमस्कंधीयद्वादशाध्यायटीकायां श्रीधरस्वामिधृतवचने। पौगंडमाह कौमारं पंचमाब्दान्तं पौगंडं दशमावधि। कैशोरमा
पंचदशात् यौवनं तु ततः परं। दशमावधीत्या पंचदशादित्येकवाक्यत्वात् ऊनैकादशवर्षस्येतू न षोडश इत्येतयोर्दशपंचदशपरता इति दशवर्षाभ्यन्तरीयबालस्य पादवि-
धानात् नास्यानुग्रहान्तरमिति प्रागेवोक्तं॥ ०॥ अथ धेनुमूल्यव्यवस्था॥ संवर्त्तः॥ प्राजापत्यव्रताशक्तौ धेनुंपय पयस्विनीं। धेनोरभावे दातव्यं तुल्यमूल्यं न संशयः। पय-
स्विनीमिति विशेषणं दुग्धोपयोगाय स च वत्सं विना न संभवतीति अतः सवत्साया एव दानं मुख्यं तदभावे यथोचितं तन्मूल्यं तच्चपुराणाचयं। द्वात्रिंशत्पणिका गावो वत्सः
पौराणिको मतः इति कात्यायनवचनात्। षट्त्रिंशन्मतमिति कृत्वा पठन्ति। धेनुः पंचभिराद्यानां मध्यानां त्रिपुराणिकी। कार्षापणैकमूल्या हि दरिद्राणां प्रकीर्त्तिता। अत्र पुरा

शाचयत्लभ्यं गोतमोक्तं हिरण्यादि कमेव देयं। तद्यथा हिरण्यं गौर्वासोऽश्वो भूमिस्तिला घृतमन्नं देयानि एतान्येतान्यादेशो विकल्पेन क्रियेरन्निति अन्यथा इदमनर्थकं स्यात् इति प्रायश्चि
२३ त्तविवेकः। तन्निंत्यं हिरण्यं गौरित्यादिना गोविकल्पत्वेन हिरण्यादिकमुक्तं न तु गोमूल्यत्वेन ततश्च द्वात्रिंशत्पणिकत्यादिवचनात्। कार्षापणात्रयमेव युक्तं तत्र ताम्रिकः कार्षिकः पण
इति याज्ञवल्क्यवचनेन गुंजाः पंचाद्यमाषकः ते षोडश अक्षः कर्षोऽस्त्रीत्यमरसिंहोक्तेन अशीतिरक्तिकापरिमितताम्रे पणशब्दः संकेतितः। स च तावत् संख्यवराटकैर्लभ्यते इति वरा
टके तथा व्यवहारः एतन्मूल्यकं भविष्यपुराणमत्स्यतंत्रयोः। अशीतिभिर्वराटैश्च पण इत्यभिधीयते। तैः षोडशैः पुराणं स्याद्रजतं सप्तभिस्तु तैरिति गोमते नोक्तपरिगणनीय नियमस्त्व
नादिष्टे प्राथमिककल्पाय आदिष्टे तु तत्त द्रव्यस्य प्राधान्यं हिरण्यादेरानुकल्पिकत्वमिति विशेषः। अतएव यमेन सामान्यतो मुक्तं शोधने न शरीरस्य तपसाध्ययनेन च। पापकृन्मुच्यते
पापाद्दानेन च दमेन च। अतः कार्षापणात्रयलभ्यं रजतादि दीयते। यत्तु मिताक्षरायां गवामभावे निष्कः स्यात्तदर्द्धं पाद एव चेति स्मरणात् निष्कादिकमुक्तं तत्र शक्तितमाद्यपेक्षया। अ २३ प्रा
त्रापि चतुः सौवर्णिको निष्क इति मनूक्तनिष्कस्य न ग्रहणमत्यन्तविषमदश मूल्यत्वात् साष्टशतसुवर्णनिष्कवत् किन्तु दीनारनिष्कस्य ग्रहणं तथा चामरः। साष्टे शते सुवर्णानां हेम्न्यु
रोभूषणे पले। दीनारेपि च निष्कोऽस्त्री तिदीनारउक्तो विष्णुगुप्तेन दीनारो रोपकैरष्टाविंशत्या परिकीर्त्तितः। सुवर्णास्त्र तितमो भागो रोपक उच्यते। सुवर्णास्तु अशीतिरक्तिकापरिमितं
कांचनं तथा चमनुः। पंचकृष्णलको माषस्ते सुवर्णस्तु षोडश। अत्र कांचनं व्यक्तमाह अमरसिंहः। सुवर्णं विस्तो हेम्नोऽक्षे इति एवं च सप्तम्यां। साधिकहेमरक्तिकारोपकः। तदष्टा-
विंशत्या द्वात्रिंशद्रक्तिकया परिमितो दीनारनिष्कः॥ ०॥ अथ स्नानव्रतादिनिरूपणं॥ तत्र गोवधस्य बुद्धिपूर्वकत्वं तदा भवति यदि गां ज्ञात्वा एतां हन्मीति इच्छयाहं तितदा कामनाद्या

दैवज्ञानस्य प्रवृत्त्यंगत्वात् तदभावे तु अबुद्धिपूर्वकत्वं अतएव प्रवृत्त्यज्ञानस्य कामना व्यभिचाराभावादेव कृच्छ्रांस्तु चतुरः कुर्य्यात् गोवधे बुद्धिपूर्वके । अमत्या तु द्वयं कार्य्यमिति विश्वामि
त्रवचने ज्ञानाज्ञानाभ्यां द्वैविध्यं । अन्यत्र कामाकामाभ्यां इत्युक्तं यथा बृहस्पतिः । कामाकामकृतं त्वेवं महापापं द्विधा मतं । पुरुषापेक्षया चैव निष्कृतिर्द्विविधा स्मृता । इत्थं च गवया
दिभ्रमेण यो वधस्तत्रापि गोवधस्य न ज्ञानकृतत्वं गोत्वेनाज्ञानात् गोत्वेन ज्ञाने त्वपि अन्यार्थक्षिप्तनाराचादिना यदि हन्ति तदापि न ज्ञानकृतत्वं तद्विषयक हननेच्छारूपज्ञानाभा
वात् वधनिरुक्तिरग्निपुराणे स्यात् प्राणवियोगफलकव्यापारो हननं स्मृतं । रागाद्द्वेषात्प्रमादाद्वा स्वतः परत एव वा ।१०॥ अथ विप्रादिस्वामिकगवीवधप्रायश्चित्तं ॥ तत्र मनुना गोषु
ब्राह्मणसंस्थास्वित्यनेन दंडप्रकरणे ब्राह्मणस्वामिकत्वेन गोर्गुरुत्वमुक्तं नारदेन च । देवब्राह्मणराज्ञां च द्रव्यं विज्ञेयमुत्तममित्युक्तं । अतस्तद्वधे गुरुप्रायश्चित्तं युक्तं तत्र मनुः
उपपातकसंयुक्तो गोघ्नो मासं यवान् पिबेत् । कृतवापो वसेत् गोष्ठे चर्मणा तेन संवृतः । चतुर्थकालमश्नीयात् अक्षारलवणं मितं । गोमूत्रेण चरेत्स्नानं द्वौ मासौ नियतेन्द्रियः
दिवानुगच्छेत्ता गास्तु तिष्ठन्नूर्ध्वं रजः पिबेत् । शुश्रूषित्वा नमस्कृत्य रात्रौ वीरासनं वसेत् । तिष्ठन्तीष्वनु तिष्ठेत व्रजन्तीषु अनुव्रजेत् । आसीनासु तथासीनो नियतो वीतमत्सरः ।
आतुरामभिशस्तां वा चौरव्याघ्रादिभिर्भयैः । पतितां पंकलग्नां वा सर्वप्राणैर्विमोचयेत् । उष्णे वर्षति शीते वा मारुते वाति वा भृशं । न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः ।
आत्मनो यदि वान्येषां गृहे क्षेत्रेथवा खिले । भक्षयन्तीं न कथयेत् पिबन्तं चैव वत्सकं । अनेन विधिना यस्तु गोघ्नो गामनुगच्छति । स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति ।
वृषभैकादशा गाश्च दद्यात्सुचरितव्रतः । अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत् । उपपातकसंयुक्तो न तु यागाद्यर्थगोवधकर्तापि अतएव सामान्यमुक्तं हारीतेन । वृथापशु

२४

घातेप्राजापत्यमिति याग्राधर्थोपिगोवधः कलौनिषिद्धः।दीर्घकालं ब्रह्मचर्य्यं धारणं च कमंडलोः।गोत्रान्मातृसपिंडाद्वाविवाहोगोवधस्तथा।नराश्वमेधौमद्यं च कलौवर्ज्यं द्विजातिभिः।इ
तिहलायुधशूलपाणिः।सएवचतुर्थकालः गृहस्थरत्नाकरधृतब्रह्मपुराणवचनात्।मद्येनिषिद्धं कर्मास्पष्टयत्पुशान्।मद्यमपेयमदेयमग्राह्यमिति। एवंच यत् दुर्गापूजादौ मद्यदानमुक्तं।
तत्कलितरपरं।कृतसशिखमुंडनोद्दतिगवीचर्म्मणा कृतपरीधानो नरावयुंठनो मासत्रयंगोष्ठेवसेत्। तत्रप्रथममासंयवान्यवागूंकृतान्पिबेत्।अपरमासद्वयं चतुर्थकालं अश्नीयात् पू
र्वदिनद्वपोष्यापरादिनशै भुंजीत सएवचतुर्थकालः मुनिभिर्द्विरसनमुक्तमितिश्रवणात् अक्षारलवणमकृत्रिमलवणं सैन्धवमिति यावत्।मितंस्वल्पंमासत्रयंधर्म्मानाह द्विवानुग
च्छेदिति अत्रमनुः।सत्वार्थेतिष्ठतीष्वित्यादिषु वह्नीनांधर्म्मः कार्य्यः।समाप्तु क्रोशकरः वीरासनंभिक्षाघनाश्रित्योपवेशनं। अभिशस्तो अतिक्रान्तो।भयैर्भय निमित्तैः सर्वप्राणैः सर्व २४ प्रा
सामर्थ्यैः विमोचयेत्। अतएव विष्णुपुराणं। समंनयतियःक्रुद्धानसर्ववंधुरमत्सरः। भीतास्वाशनकृत्साधुः स्वर्गस्तस्याल्पकंफलं। गांनकथयेत् निवरणाभिप्रायेण।पिवन्तं चैववत्
सकमितितल्लन्यमितिशेषः।स्तुचरितव्रतःसम्यक्सुचरितव्रतः। वृषसहितदशगादद्यात्। तदभावेस्वस्वमपि सर्वस्वं दक्षिणार्थं दद्यात् ॥ अथधेनुसंकलनं॥ तत्रत्रैमासिकव्रतेए
कमासयवपानं प्राजापत्यद्वयतुल्यं यतोयमेनास्थ्यादिभंगे मासार्द्धयवपानमुक्तं तत्रैवगोभिलेन प्राजापत्यमुक्तं।यथामदनदेवभट्टधृतंयमवचनं। अस्थिभंगंगवांकृत्वालांगूल
च्छेदनंतथा। पातनेकर्णशृंगाणां मासार्द्धंतु यवान्पिबेत्। स्मृतिसागरे गोभिलः। कर्णलांगूलयश्छेदे मस्थिभंगं विधायच। प्राजापत्यव्रतं कुर्युश्चत्वारो ब्राह्मणादयः। अत्रयच्छु
द्रस्य द्विजत्वस्य प्रायश्चित्तमुक्तं तदास्थिभंगादिमात्रपरं। वैश्यतुल्यशूद्रपरंवाएवंचयत् प्रायश्चित्तविवेके मासयावकपानं क्वचिद्दादश प्राजापत्यतुल्यमुक्तं। तन्मोमूत्रमात्रसिद्ध्या

वकयवपरं। क्वचिच्च प्राजापत्यद्वयतुल्यं ततसिद्धानंतर प्रक्षिप्तगोमूत्र परमित्यविरोधः। मासद्वय चतुर्थकालभोजने त्रिंशदुपवासाः। त्रिंशताच। नक्ते दशोपवासोः। तथाच शूलपाणिमहामहो
पाध्यायैस्त्रिंशद्वा निरंतरोपवासाः पंचदश प्राजापत्यतुल्याः मासोपवासधेनुसंकलनेनोक्ताः अत्रैकांतरितत्वादिति कर्त्तव्यतायोगित्वाच्च एकादश प्राजापत्यतुल्याः तद्वत्रिंशन्नक्तभोजनेच तः
प्राजापत्यतुल्यं। मासैकगोमूत्रयावकेन कृच्छ्रद्वयंमिलित्वाचैमासिकव्रतं सप्तदश प्राजापत्यतुल्यं तदभावे सप्तदशधेनवोदेयाइति बहुसम्मता व्यवस्था भवदेवभट्टसम्मतात्वष्टादश
धेनवइति पूर्वोक्ताच दक्षिणादेयाइति। तदशक्तौ एकपंचाशत् षट्त्रिंशत्कार्षापणा वादेयाः दक्षिणायांच षड मूल्यं कार्षापणा पंचकं गोदशकमूल्यं कार्षापणा दशकमिति तुज्ञा
नतः। अज्ञानतोऽर्द्धं। एतच्च षट्त्रिंशन्मतानुष्ठिनाष्ट त्र गुडविषाग्न्यादिभिः प्रायिकमृत्युफलके हनने। तथाच बृहस्पतिः। शस्त्रादिनातु हत्वा गां मानवं व्रतमाचरेत्। स्त्रीशूद्रबालवृद्ध-
घ्नानामर्द्धं। एकस्यैतदुभयधर्म्मवत्त्वेपादः। एवंच ब्राह्मणादीनांसगुणत्वनिर्गुणत्वादिना कालदेशादितारतम्येन लघुगुरुप्रायश्चित्तांतरं बोद्धव्यं। सप्तविगुणा साहस्र
मानन्त्यंच यथाक्रमं। दानेफलविशेषःस्यात् हिंसायांचैतद्दवहीति दक्षवचनात्। क्षत्रियसंबन्धिन्या वधेतु देवलः। गोघ्नः षण्मासांस्तच्चर्म्मणा परिवेष्टितः। गोग्रासहारो गो
व्रतोपवासी गोभिरभिसंचरन् विप्रमुच्येतेति। गोग्रासाहारो गोग्रासाहर्त्ता कर्म्मणि साधु। षण्मासयावभक्षणं द्वादशप्राजापत्यतुल्यं दक्षिणा च विशेषानुपदेशात् यथाशक्ति दे
येति एतज्ज्ञानादज्ञानादर्द्धं स्त्रीशूद्रबालवृद्धघ्नानामर्द्धं एकस्यउभयधर्म्मवत्त्वे पादः। वैश्यसंबंधिन्या वधेतु शातातपः। पंचगव्येन गोघाती मासैकेन विशुध्यति गोमतीं च ज
पेद्विद्यां गवां गोष्ठे च संवसेत्। पंचगव्यमाहट्ट शातातपः। गोसहस्रद्विगुणं मूत्रं सर्पिर्विद्याच्चतुर्गुणं। क्षीरमष्टगुणं चैव पंचगव्ये तथा दधि। तथाष्टगुणो यमः। आह्रत्य प्रणवेगो

25 वउत्थाप्य प्रणवेन च। प्रणवेन समास्तोऽप्य प्रणवेनैव तत् पिबेत्। उत्थाप्य मिश्रीकृत्य एतद्वैकाहिकं। द्रव्ये परिमाणान्तरं। मतांतरं च ग्रंथगौरवान्नोक्तं। गोमतीविद्यामाह प्रायश्चित्तकां
डकस्य ततो यमः॥ गोमतीं कीर्तयिष्यामि सर्वपापप्रणाशिनीं। तान्तु मे गदतो विप्राः शृणुध्वं सुसमाहिताः। गावः सुरभयो नित्यं गावो गुग्गुलगंधिकाः। गावः प्रतिष्ठा भूतानां गावः
स्वस्त्ययनं महत्। अन्नमेव परं गावो देवानां हविरुत्तमं। पावनं सर्वभूतानां रक्षंति च वहंति च। हविषा मंत्रपूतेन तर्पयन्त्यमरं दिवि। ऋषीणां अग्निहोत्रेषु गावो होमप्रयोजिकाः।
पावनं सर्वभूतानां गावः शरणमुत्तमं। गावः पवित्रं परमं गावो मंगलमुत्तमं। गावः स्वर्गस्य सोपानं गावो धन्याः सनातनाः। नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्म
सुताभ्यश्च पवित्राभ्यो नमो नमः। ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतं। एकत्र मंत्रास्तिष्ठंति हविरन्यत्र तिष्ठति। मंत्रज्ञाने तु मिताक्षरायां षट्त्रिंशन्मतं। जपहोमादि यत् किं
चित् कृच्छ्रोक्तं संभवेन्न चेत्। सर्वं व्याहृतिभिः कुर्यात् गायत्र्या प्रणवेन च। गवां गोष्ठे शतिभिश्च वराकुंडलवत्। तात्कालिकगोसत्त्वावबोधनाय गोमतीजपसहितमासैकपंचावेत २५ प्रा
पानं प्राजापत्यपंचकतुल्यं। एतदज्ञानकृते ज्ञानकृते तु द्वैगुण्यं स्त्रीशूद्रवालवृद्धानामर्द्धं। एकस्यैतदुभयधर्म्मवत्त्वे पादः। शूद्रसंबन्धिन्या वधे तु विश्वामित्रः। कृच्छ्रांस्तु च
तुरः कुर्यात् गोवधे बुद्धिपूर्वकं। अप्रमत्यां तदर्द्धं कार्य्यं तदर्द्धं वालवृद्धयोः। स्त्रीशूद्रयोरेवमेतदर्द्धे चैव न संशयः। कृच्छ्रान् प्राजापत्यान् तत्र चतुष्ट्याशक्तौ च तत्स्थाने नवः द्वादश
कार्षापणा वा। एतज्ज्ञानकृते अज्ञानकृते तु प्राजापत्यद्वयं। तदशक्तौ धेनुषट्कार्षापणा वा देया॥ स्त्रीशूद्रवालवृद्धानामर्द्धं एकस्यैतदुभयधर्म्मवत्त्वे पादः स्वामीकृतविशे
षस्तु प्रायश्चित्तविवेकात् तु सारादुक्तः। व्यवस्थातु तत्तदुपदेशिकं वस्त्रादितापरितोष्य ग्राह्या पञ्चदाने शूद्रेणाज्ञानकृतशूद्रस्वामिकगवीवधजन्यपापक्षयाय प्राजापत्यव्रतं

प्रायश्चित्तं करणीयं। तदशक्तावेकधेनुदानं तदशक्तौ कार्षापणत्रयदानं यथाशक्ति दक्षिणा देया। एतत्सर्वं पूर्वदिने सशिखं वपनं कारयित्वा उपोष्य हूतं प्राश्य करणीयं प्रायश्चि
त्तानन्तरं पार्वणविधिना शुद्ध्यर्थं श्राद्धं कर्त्तव्यं दशान्यूनः ब्राह्मणेभ्यो भोज्यादिकं देयं एतत्सर्वं गोस्वामिनं मूल्यादिना परितोष्य करणीयमित्यनुकस्य मतं इति लेखः। एवम
न्यत्रापूहेन लेख्यं विशेषदक्षिणा प्रशक्तौ तस्यैव लेख्या केशरक्षणे तु प्रायश्चित्तद्वैगुण्यं दक्षिणा च द्विगुणा। यो षितां मुंडने अंगुलिद्वयमिति सर्वकेशाग्रच्छेदनं कर्त्तव्यमिति ले-
ख्यं। प्रायश्चित्तकरणे तु मासपक्षाद्युद्देख्यं। अमुकपापक्षयकाम इदं कां चनादिकमिति वाक्यविशेषो वा द्रष्टव्यः। वाक्येनारायणं च स्मरेत्। प्रातर्निशि तथा संध्यामध्याह्नादिषु संस्मरन्।
नारायणमवाप्नोति सद्यः पापक्षयं नरः इति विष्णुपुराणवचने पापक्षय इति श्रुतेः। गर्भिण्यादौ विशेषमाह बृहस्पतिः। गर्भिणीं कपिलां दोग्ध्रीं होमधेनुं च सुव्रतां। रोधादिना घातयि
त्वा द्विगुणं गोव्रतं चरेत्। गर्भिणीवधे विशेषमाह वृद्धयमः। गवां निपातने चैव गर्भनाशो भवेद्यदि एकैकं तु चरेत् कृच्छ्रं यथापूर्वं तथापरं। कृच्छ्रपादव्रतपरं। द्विगुणं गोव्रतमित्ये
कवाक्यत्वात् पदुत्पन्नमात्रे तु द्वौ पादौ गात्रसम्मिते। पादोनं व्रतमाचष्टे हत्वा गर्भमचेतनं। अंगप्रत्यंगसंपन्ने गर्भे चेतःसमन्विते। द्विगुणं गोव्रतं कुर्यात् प्रायश्चित्तं विशुद्धये।
मध्यवचनं भवदेवभट्टेन व्याख्यातं। यथा लगुडाद्यभिघाते न गोर्जीवति गर्भमात्रपाते यथोक्तं प्रायश्चित्तपादाचरणं गात्रावयवोत्पत्तौ प्रायश्चित्तपादद्वयं सकलगात्रनिष्पत्तौ चै
तन्याभावे प्रायश्चित्तपादत्रयमिति अर्थाच्चैतन्ययुक्ते गर्भघाते कृतस्तमेव प्रायश्चित्तमूहनीयमिति मिताक्षरायान्तु गर्भिणीवधे यदा गर्भोऽपि निहतो भवति तदा प्रतिनिमित्तं नैमित्तिकं च
वर्त्तते इति न्यायादविशेषेण द्विगुणव्रतप्राप्तौ षड्विंशन्मते विशेष उक्तः पादुत्पन्नमात्रे तु द्वौ पादौ हृढतां गते। पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनं। अंगप्रत्यंगसंपन्ने गर्भे चेतःसमन्विते।

२८ द्विगुणं गोव्रतं कुर्य्यात् एषा गोघ्नस्य निष्कृतिः । दोग्ध्रीवकृक्षीरं बृहस्पतिः । अतिवृद्धामतिकृशामतिबालां च रोगिणीं । हत्वा पूर्वविधानेन चरेदर्द्धव्रतं द्विजः । अतिवृद्धां वृद्धत्वेन नष्टाक्षीरदांस
मर्थां अतिकृशां कृशत्वेन दोहनवाहनायोग्यां अतिबालां वर्षपर्य्यन्तं बालामिति कान्तो तथा च बृहद्गिरः । वर्षमात्रा तु बालस्यादिति बाला द्विवार्षिकी । अतः परन्तु सा गौः स्यात्तरुणीद
न्तजन्मनि । अत एव वक्ष्यति द्विपादस्तु द्विहायन इति । संवर्त्तः । व्यापन्नानां बहूनां च बंधने रोधने पि वा । प्रायश्चित्तमपि तथा बहूनामित्येकाधिकपरं तदविवक्षायामपि गोद्वयवधे प्रयत्ना
भेदे पि विशेषवचनाभावात् प्रायश्चित्तद्वैगुण्यं युक्तं अपिशब्दात् गृहदाहादिना कामकृते तु प्रायश्चित्तावृत्तिः यथोपपातकावृत्तौ यमः । गोघ्नवद्विहितः कल्पश्चान्द्रायणमथापि वा । अ
भ्यासे तु तयोर्भूयस्ततः शुद्धिमवाप्नुयात् । तयोर्गोवधतदन्योपपातकयोः प्रकृतिविकृतिभूतयोः तथा संवर्त्तापस्तम्बौ । एका चेत् बहुभिः कापि दैवात् व्यापादिता भवेत् । पादं पादं च हत्या
या चरेयुस्ते पृथक् पृथक् । हत्याया यत्र यद्विहितं व्रतं तत्र तस्यैव पादं प्रत्येकं कुर्य्युः । एका चेदित्युपलक्षणं । अतो बहुभिर्द्वयोर्वा बहूनां च हनने प्रतिपुरुषं पादद्वयं त्रयं वा कल्पनीयमि २६ प्रा
ति मिताक्षरा । वस्तुतस्तु एकाधिकानामेकैकपुरुषस्यैकप्रयत्नवधे व्यापन्नानां बहूनामिति पूर्वोक्तवचनादेकैकपुरुषस्य द्विपादं कृत्वा प्रायश्चित्तं । प्रयत्नभेदे तु गोघ्नवदित्यनेन तंत्रता
या अभावात् प्रत्येकं प्रतिपुरुषं पादावृत्तिरिति । एतच्चाकामतो वधे द्रष्टव्यं दैवादिति विशेषोपादानात् कामकृते तु बहूनामिति मपि प्रत्येकं कृत्स्नदोषसंबन्धात् संपूर्णप्रायश्चित्तं
युक्तं सन्निपातफलमिव । प्रतिपुरुषं कृत्स्नव्यापारसमवायात् । एकं प्रति बहूनां च यथोक्तात् द्विगुणो दम इति प्रत्येकं दण्डद्वैगुण्यदर्शनाच्चेति मिताक्षरा । वस्तुतस्तु सर्वत्र पापेस्य-
त्वकामकृते यत्तद्विगुणं बुद्धिपूर्वके इत्यंगिरोवचनेनाज्ञानात् ज्ञाने द्वैगुण्यदर्शनादत्रापि ज्ञाने द्विपाद एव युक्तः । सत्रेतु सप्तदशावरा ऋद्धिकामाः सत्रमुपासीरन्निति श्रवणान्तथेति

एकं घ्नतां बहूनामिति वचनं तु गोवधातिरिक्तविषयं। गोवधे एकाचिदित्युपदेशेन दंडवत्प्रायश्चित्तानि भवन्तीत्यतिदेशानवसरात्। तदवसरत्वे प्रत्येकं संपूर्णप्रायश्चित्तद्वैगुण्यं स्यात् न
पूर्णप्रायश्चित्तमात्रं अतएव प्रायश्चित्तविवेके। एकं घ्नतां बहूनामिति मनुष्यवधे उक्तं बहुभिरित्युपादानात्। द्वाभ्यां हनने प्रत्येकं संपूर्णमिति। अथैकहायनादिगोवधप्रायश्चित्तं॥
हहप्रचेताः॥ एकवर्षे गवि हते कृच्छ्रपादो विधीयते। अबुद्धिपूर्वं पुंसः स्याद्द्विपादस्तु द्विहायने। त्रिहायणे त्रिपादः स्यात् प्राजापत्यमतः परं इदमपि प्रायश्चित्तलाघवेनाबुद्धिपूर्वका
धमशक्तस्वामिकविषयमिति प्रायश्चित्तविवेकः। तेन पत्स्वामिकगववधे प्रायश्चित्तं तस्यैव तत्र पादादिकमूहनीयं। अतएव अतिबालामित्यत्र तथैवोक्तं। अतः परं चतुर्हायणादौ
इत्यर्थः। बुद्धिपूर्वके तद्द्विगुणमित्यर्थः॥ ०॥ अथ रोधादिनिमित्तकगोवधप्रायश्चित्तं। अंगिराः। रोधने बन्धने वापि योजने वा गवां रुजः। उत्पाद्य मरणं वापि निमित्ती तत्र लिप्यते।
पादं चरेद्रोधवधे द्वौ पादौ बन्धने चरेत्। योजने पादहीनं स्यात् चरेत्सर्वं निपातने। निमित्ती लिप्यत इति। यथा कथंचिन्मरणे निमित्ततार तारतम्येन। यो भूय आरभते तस्मिन् फले
विशेष इत्यापस्तंबवचनात्। पापविशेषेण लिप्यते तद्विशेषात्प्रायश्चित्तविशेषमाह पादं चरेदित्यादि रोधः क्षीणया गोरास्वप्रचारनिर्गमनिरोधः। बंधनमयथाबंधनमकारा
बंधनं च योजनं हलशकटादौ योजनं तत्रातिवाहादिनेति शेषः अत्रैव विषये च्यवनः प्राजापत्यद्वयं गोहत्यायाः प्रायश्चित्तं रोधनबंधनयोक्तवधे पादपादहृस्वानखानि
लोमानि शिखावर्जं सशिखवपनं त्रिसवनं गवानुगमनं सहशयनं स्तमहत्तृणानि चरथ्यास्तु चारयेत्। व्रतान्ते ब्राह्मणभोजनमिति। रोधनबन्धनयोक्तवध इत्यादेरयमर्थः। रोध
निमित्तवधे प्राजापत्यस्य पादः प्रायश्चित्तं नखच्छेदनमात्रं बंधननिमित्तवधे प्राजापत्यस्य द्वौ पादौ नखानां लोम्नां च छेदनं योक्त्रनिमित्तवधे प्राजापत्यपादत्रयं। नखानां लोम्नां

२७ शिखावर्जं केशच्छेदनं च दंडादिप्रहारवधसंपूर्णं प्राजापत्यं नखलोमशिखासहितकेशच्छेदन इति कल्पतरुः। एतद्विषयमेव मिताक्षराधृतसंवर्त्तवचनं। एकवाक्यत्वात्। तद्यथा पादेंग
लोमवपनं द्विपदे श्मश्रुणोपि च। त्रिपादे च शिखावर्जं सशिखं तु निपातने इति। तत्र प्राजापत्यस्य पादादित्वे किं मानमिति चेत् पराशरवचनं। रोधने तु चरेत्पादं बंधने चार्द्धमेव च। योजने पाद
हीनं स्यात्प्राजापत्यं निपातने इति निपातने दंड निपातने कृच्छ्रमज्ञानताडने इति बार्हस्पत्यात्। दंडोऽग्रहस्तप्रमाणो ग्राह्यः न तु तदधिकं तदधिके तु द्विगुणप्रायश्चित्तश्रवणात्। यथांगि
राः। अंगुष्ठमात्रः स्थौल्येन वा कुमात्रः प्रमाणतः। सद्रश्चमपलाशश्च दंड इत्यभिधीयते। तस्माद्दूर्ध्वप्रमाणेन यदि गां विनिपातयेत्। द्विगुणं तु भवेत्तत्र प्रायश्चित्तमिति स्थितिः। सपलाशः
सपत्रः एतद्वचनविषय एव च्यवनोक्तं प्राजापत्यद्वयमिति। एतदज्ञानतः तथा च बृहस्पतिः। पादं चरेद्रोधवधे कृच्छ्रार्द्धं बंधघातने। अतिवाहे च पादोनं कृच्छ्रमज्ञानताडने। अज्ञानं च क्षीण
या मक्षीणत्वभ्रमः क्षीणयज्ञाने तु प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चांद्रायणपादादिकं। यथा हारीतः। नासाच्छेदनदाहेतु कर्णच्छेदनबन्धने। अतिदोहातिवाहाभ्यां कृच्छ्रं चान्द्रायणं चरेत्। २७ प्रा
हत्वेति शेषः। कृच्छ्रं व्रतं तेन चांद्रायणानीत्यर्थः इति शूलपाणिमहामहोपाध्यायाः। भवदेवभट्टस्तु। निपातने कूपावटादिषु निपातने इति व्याख्यातं एतदपि युक्तं अन्यथा तत्र पात-
जनकभयादिप्रदर्शकस्य प्रायश्चित्ते न ध्यवसायापत्तेः। शस्त्रादिना तु हत्वा गां मानवं व्रतमाचरेत्। रोधादिना त्वांगिरसमापस्तंबोक्तमेव वेति बृहस्पत्युक्तस्य प्रथमादिपदात् बुद्धि
लोष्टलगुडविषाग्न्यादीनां ग्रहणं रोधादिनेति। यथाकथंचिन्निमित्तमात्रस्य बंधनादेरिति शूलपाणिव्याख्यानाच्च तस्मान्निपातनपदं उभयपरं एतच्च रागे चौररक्षार्थं रोधबन्धनव्यतिरि
क्त विषयं संयमनार्थं तु न दुष्येद्रोधबन्धयोरिति अंगिरोवचनात्। बन्धने मिताक्षरायां विशेषमाह व्यासः। न नारिकेलैर्न च शाणवालैर्न चापि मौंजैर्न च बंधशृंखलैः। एतैस्तु गावो
णायं

न चवंधनीयाव धातुतिष्ठेत परशुं गृहीत्वा। कुष्ठैः काष्ठैश्च वध्नीयात्स्थाने दोषविवर्जिते। अथापालननिमित्तकगोवधप्रायश्चित्तं॥ तत्र पराशरः। सीतानिलहता चैव उद्बन्धनमृतापि वा।
शून्यागारादुपेक्षायां प्राजापत्यं विनिर्दिशेत्। अपालनात्प्रणाशेपशुगोश्वरन्ती कथंचन। जलौघमपपन्ना लेमग्ना नागविद्युद्धतापि वा। श्वभ्रे वा पतिता कस्मात् श्वापदैर्वापि भक्षिता। प्राजा
पत्यं चरेत्कृच्छ्रं गोस्वामी व्रतमुत्तमं। सशिखं वपनं कार्य्यं त्रिसन्ध्यमवगाहनं। शृंगैर्वा विखुरैर्युक्तं सांगूलं श्रवणादिभिः। आर्द्रमेव हितं चर्म परिधाय सगां व्रजेत्। तासां मध्ये वसेद्रा
त्रै दिवा ताभिः समं व्रजेत्। ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः। प्रायश्चित्ते ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनं। अनुडुत्सहितां गां च दद्याद्विप्राय दक्षिणां। तत्र गोस्वामीत्यभि
धानात्तउत्सृष्टवृषवत्सतरीषु स्वत्वाभावाद् पालननिमित्तकतद्वधे तदुत्सृष्टदोषो नास्तीति प्रतीयते तत्स्वत्वाभावेनान्येषां सम्भाव्यमानसोपादानादिकं सत्वं निराकरोति कस्य
तरुध्धृत ब्रह्मपुराणं अथ हुत्ते वृषोत्सर्गे दाता वक्रोक्तिभिः पदैः। ब्राह्मणानां च यत्किंचिन्न योत्सृष्टन्तु निर्जने। तत्कश्चिदन्यो न नयेवित्याज्यं च यथाक्रमं। न वाह्यं न च तत्क्षीरं पा
तव्यं केनचित्क्वचित्। वक्रोक्तिभिः काकुक्तिभिः स्वाम्यभावेनोत्सृष्टपशोः पालननियमाभावात् धान्यादिभक्षणे मोच्यत्वमाह याज्ञवल्क्यः महोक्षोत्सृष्टपशवः सूतिकागन्तुका
दयः पालोयेषान्तु ते मोच्या देवराजपरिप्लुताः। महोक्षो निवार्य्यमहाबलिवर्दः। उत्सृष्टपशवः देवतोद्देशेन पित्रादिनिष्टफलोद्देशेन वा चक्राद्यंकितत्यक्तस्वत्वपशवः। सूति
काअनिर्गतदशाह। आगन्तुकाग्रामान्तराद्गताः। आदिशब्दात्तउशनशोक्ताश्च। अदंड्या हस्तिनोऽश्वाश्च प्रजापाला हिते स्मृताः। अदंड्याः काणाकुंठाश्च वृषभः कृतलक्षणाः।
कुंठः खंजः। अत्र काणाकुंठशब्दाभ्यामत्यंतालक्षणत्वउच्यते। वृषभः कृतलक्षणः प्रागुक्तउत्सृष्टपशवः एते सपाला विपाला वा सर्वथा मोच्या। तथा च मनुः। अनिर्दशाहां गां सूतां

२५ ष्टवान्देवपशूंस्तथा। स पालान्वा विपालान्वा अदण्ड्यान्मनुरब्रवीत्। एतद्भिन्नानां येषां च पालोऽस्ति तेऽपि मोच्याः। अर्थात्तत्र पालो दंडनीयः देवराजपरिप्लुतागजादिभ्यवद्भातश्चैन्यादि
दर्शनाद्वापलायिताः। पशवो यदि क्षेत्रे चरन्ति तदा न दोष इत्यर्थः। पालकान्तरस्तत्वेत्याह मनुः दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे। योगक्षेमोऽन्यथा चेत्तु पालो वक्तव्यतामियात्।
दिवा पशूनां पालहस्तन्यस्तानां योगक्षेमविषये दोषे जाते पालकस्य गर्हणीयता रात्रौ पुनः पालकप्रत्यर्पितानां स्वामिनो दोषः अन्यथा तु यदि दिवा रात्रावपि पालहस्तगता भवन्ति तदा
दोषे उत्पन्ने पाल एव गर्हणीयतां प्राप्नोतीति कुल्लूकभट्टः। स्मृतिसागरसारे बृहद्गिराः। अनागतस्य चारे तासां आगतस्य च रक्षणे वाः। रात्रावपि यदा न्योऽस्ति तदा स्वामी न दोषभाक्।
दण्डप्रकरणोक्तं मनुवचनं प्रायश्चित्ते कथमिति चेन्न दंडवत्प्रायश्चित्तानि भवन्तीति श्रुतेः तथा व्यवहाराच्च। एवं यत्रापवर्त्ते तद्युग्यं वैगुण्यात्प्राजकस्य तु। तत्र स्वामी भवेद्दण्ड्यो हिं-
सायां द्विशतं दमम् इति मनुवचने यत्र सारथेः कौशल्याद्यानमन्यथा गच्छति। तत्र हिंसायां अशिक्षितसारथिनियोगात्स्वामी द्विशतं दण्डं दाप्यः स्यादिति कुल्लूकभट्टव्याख्यानदर्शनात् २८ प्रा
अयोग्यपालकसमर्पणो स्वामिनो दोषात्तस्यैव प्रायश्चित्तं तथा। यावत् शस्यं विनश्येत् क्षेत्रे तावत्फलं लभेत्। पालस्ताड्योऽथ गोस्वामी पूर्वोक्तं दंडमर्हतीति याज्ञवल्क्यवचनेन
गवादिदोषेण यावत्सस्यं विनश्यति तावदेव पालकात्प्राप्तव्यं। पालकाशक्तौ पालस्ताड्यः। गोस्वामी पूर्वोक्तं दंडादिकमर्हतीति दर्शनात् गोवधप्रायश्चित्तेऽपि पालकद्रव्यासं-
भवे स्वामिना द्रव्यं दत्वा प्रायश्चित्तादिकं कारयितव्यं। शक्तपालके तु स्वयं कर्त्तव्यं। सशिखवपनं च नैमित्तिकेन सशिखं वपनेन सदा वपनं शिखारहितेन त्वित्यस्यागायत्र्या तु शिखां वर्ज्ज्यौने
ऊर्ध्वं त्यां ब्रह्मरन्ध्रतः। पञ्चाङ्गुलिकां वर्जयित्वा ततः कर्म समाचरेदिति। ब्रह्मपुराणोक्तस्य नित्यस्य न दोषाय फलं च मसेन सोमस्य बाधवत् गोदोहनेन चमसस्य बाधवच्च। सशिखं वपनं कार्यं

मास्नानात् ब्रह्मचारिणः इति कात्यायनेन कृतछंदोगपरिशिष्टेप्येवं। एतदेकश्रुतिमूलकत्वात् तद्धृत पारस्करीये पर्य्युप्तशिरसमिति सूत्रेपि तथैवार्थः। तद्भाष्यकृता हरिशर्मणापि परिस
र्वतोभावेनउप्तशिरसं मुंडितशिरसमिति व्याख्यातं। न च एतेनूनशिखावान् तस्य दर्शनेन रचिरोगृतैः। कुशाः काशा विराजन्ते वटवः सामगा इव इति विष्णुपुराणवचनं इति विशेषाच्छान्द्येषां-
नन्नूतशिखत्वमिति वाच्यं प्रागुक्तवचनात्। सर्वेषां सशिखवपनप्राप्ते विध्यन्तरकल्पनापत्तेश्च। तथा सामगयोरैष्यन्तु हरिनस्तुरवहेतुत्वेनाप्युक्तं तयोस्तुरवहेतुत्वं च नक्षत्वेन गाय-
कत्वेनेति शेषः। एवं प्राचीनावीतित्वादिना सदोपवीतिनाभाव्यमित्यस्य वाध इति प्रसंगादुक्तमिति। ब्राह्मणस्य विशेषेणेति ब्राह्मणस्य गवानुगमनं दुरवं। एतेनापालनकृतगोवधे प्रा
जापत्यं करणीयं। अत्रेतिकर्त्तव्यतापि प्राजापत्यतुल्येति पंडितसर्वस्वे हलायुधः। हेमगौश्च दक्षिणा ब्राह्मणभोजनं विशेषयति यज्ञपार्श्वः। गर्भाधानादि सर्वेषु ब्राह्मणान भोज
येद्दश। प्राजापत्यद्वयाशक्तौ धेनुस्वयं तदशक्तौ षट्कार्षापणादेयाः। एवं हेमनमूल्यं पंचकार्षापणा गोमूल्यं कार्षापणएकः। शूलपाणिप्रभृतिभिस्त्वितिकर्त्तव्यतायां विशेषो
नाहृतः। एतच्छूद्रस्वामिकेतरगोवधविषयं शूद्रस्वामिकस्याज्ञानात् साक्षाद्वधे यत् किंचिद्दक्षिणाकप्रकृच्छ्रद्वयस्य निबन्धृभिर्व्यवस्थापितत्वेनापालनवधे तदधिकस्यायुक्तत्वात्
वरं तु स्वल्पकृच्छ्रद्वयं युक्तमुत्पश्यामः। अत एवैतत् विषयमेव स्मृतिसागरसारे हृहदंगिराः। अरक्षिते च कूपादौ मृते व्याघ्रादिभिर्हते। व्रतार्द्धमाचरेत्स्वामी रक्षिते नास्ति दूषणं। व्रतार्द्धं
कामकृत व्रतार्द्धं नास्ति दूषणमिति प्रमत्ता गौर्यदि निवारयन्तं पालकमतिक्रम्य गर्त्तकान्तारादौ म्रियते तदा नास्ति दूषणमित्यर्थः। अन्यत्तु। सत्येव पालके सम्यक् पालनाभावे न
श्वभ्रादौ पाते तामरणे प्रायश्चित्तमाह विष्णुः। यन्त्रलोष्टकव्याघ्रस्वापदादिनिपातनेश्वभ्रोहृद्यमनसर्पाद्येर्मृते पादानमाचरेत्। अपालने तु कृच्छ्रस्यापि शून्यागारादिषु पत्त्वैव। पादोनं प्राजप

२९ तस्यैवउत्तरवचनेहच्छूपदश्रवणात्। तथापादश्चाप्राप्तकेदयोवत्सस्यस्वामिन्यरक्षिते। अप्राप्तकेप्राप्तदन्त्यावस्थकेत्रिहायणपर्य्यन्तइतियावत्। एवंभूतेवत्सेरक्षितेश्वभ्रपाताद्दिनामृते
सतिस्वामिनीतिस्वामिना प्राजापत्यपादः करणीयः। अत्रपादमात्रप्रायश्चित्तत्वात्बालत्वा। दिनानानुग्रहः। अतश्चाप्राप्तदन्त्यावस्थगोवत्सापालननिमित्तकं वधजन्यपापक्षयकामइति इ
तियोज्यं। अत्रविभ्रयाद्वेद्धतः सर्वान्ज्येष्ठोभ्रातायथापिता। भ्राताशक्तः कनिष्ठोवाशक्त्यपेक्षाकुलस्थितिरितिनारदोक्तेकगृहिरूपतयास्थितानामविभक्तानांसंसृष्टानांचापालनाद्या-
दिगोप्रनाशः तत्रैकतरकृतप्रायश्चित्तेनसर्वेषांपापनाशः एकपाकेनवसितांपितृदेवद्विजार्चनं। एकंभवेद्विभक्तानांतदेवस्याद्गृहेगृहेइतिबृहस्पतिवचनेनभ्रातृणामविभक्तानामे
कोधर्म्मः प्रवर्त्तते। विभागेसतिधर्म्मोपिभवेत्तेषांपृथकपृथक्इतिनारदवचनेनच। एकत्रवासिनामेकतरकृतवैदिककर्म्ममात्रेणसर्वेषांफलभागित्वात्अन्यथैकतरकृतपंचमहा २८ प्रा
यज्ञैस्ताद्ब्राह्मणानांसर्वेषांपंचसूनापापनाशोनस्यात्। तदुक्तंमनुना। अध्यापनंब्रह्मयज्ञः पितृयज्ञस्तुतर्पणं। होमोदैवोवलिर्भौतोनृयज्ञोऽतिथिपूजनं। पंचैतान्योमहायज्ञान्नहाप
यतिशक्तितः। सगृहेपिवसेन्नित्यंसूनादोषैर्नलिप्यते। सूनादोषैः। पंचसूनागृहस्थस्यचुल्लीपेषण्युपस्करः। कण्डनीचोदकुंभश्चवध्यतेयास्तुवाहयन्। इतिस्वोक्तैः सूनाहिंसा
स्थानानिचूल्लीपाकस्थानंपेषणीदृषदुपलादिउपस्करः सम्मार्जन्यादिः। कंडनीमुषलोदूखलादिः एताः सूनाः स्वस्वकार्य्येप्रापयन्पापेनयुज्यतेपुरुषइत्यर्थः। अन्यथाचदंपत्योर्म-
ध्यगंधनमित्यनेनतत्रगविपत्न्याः स्वामित्वात्तस्याअपिप्रायश्चित्तान्तरंस्यात्। ननुआम्नायेस्मृतितंत्रेचलोकाचारेचसूरिभिः। शरीरार्द्धंस्मृताजायापुण्यापुण्यफलेसमाइतिबृह
स्पतिवचनाज्जायापत्योर्विभागोनविद्यते तथापुण्यापुण्यफलेसमेतिआपस्तंववचनाच्चैवंभूतविषयेभर्तृकृतादेवप्रायश्चित्तात्तन्नाशइतिचेत्भ्रात्रादीनामप्येकपाकेनवसतामिति

प्रागुक्तवचनद्वयात्तथेति। यदितु साधारणधनदानेन प्रायश्चित्तं कृतं तदा सुतरां सर्वेषां पापक्षयः। अतएवाधवाद कल्पतरुप्रभृतिषु बृहस्पतिः। बहूनां सम्मतो यस्तु दद्यादेकं धनं नरं।
करणं कारयेद्वापि सर्वैरेव कृतं भवेत्। तथा च। पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः इत्याद्युक्तपापक्षयायाश्वमेधिके पर्वणि युधिष्ठिरं प्रति व्यासवाक्यं। अश्वमेधो हि राजेन्द्र पाव
नः सर्वपाप्मनां। तेनेष्ट्वा वै विपाप्मा त्वं भविता नात्र संशयः। अत्रैव भगवद्वाक्यं भीमसेनार्जुनौ चैव तथा माद्रवतीसुतौ। इष्टवन्तो भविष्यन्ति त्वयि इष्टवति पार्थिव। उपसंहारेपि वैशम्पा
यनः॥ स्नात्वा चावभृते राजा विपाप्मा भ्रातृभिः सह। सम्राजमानः शुशुभे महेन्द्रस्त्रिदशैरिव। अविभक्तानां पालकानां मध्ये कं प्रायश्चित्तं। विभक्तानान्तु पादं पादं एकाचेदिति प्रागुक्तात्
बहूनां गवामपालनवधे द्विगुणं प्रायश्चित्तं। आपन्नानां बहूनामिति प्रायुक्तेः। तत्रापि बहुकर्तृके प्रत्येकं पादद्विगुणं प्रायश्चित्तमिति। गोवधे गुरुलघुप्रायश्चित्तान्तराणि यथायथं
द्रव्यतत्स्वामिसगुणात्यन्तनिर्गुणत्वदेशकालविशेषप्रयोजनादिभेदेन व्यवस्थेयानि॥ अथ गोवधापवादः॥०॥ पराशरः॥ धूर्यैर्बृहन्मानेषु दंडेनाभिहतेषु च। काष्ठेन लेष्टुना वा
विपाषाणेनाहताडितः। मूर्छितः पतितश्चैव मृतो वा स च स एव च। एवं गतानां धूर्याणां प्रवक्ष्यामि यथाविधि। उत्थितं तु पदं गच्छेत् पंच सप्त दशाथवा। ग्रासं वा यदि गृह्णाति तोयं वा
पिबति स्वयं। पूर्वव्याधिविनष्टानां प्रायश्चित्तं न विद्यते। यदि व्याधिप्रवृत्तानां हननाणां हस्तयोजनमात्रेण स्वल्पतरदण्डाभिघातेन वा मूर्छापतनं भवति अनन्तरं गमनग्रासादौ कृ
ते मरणं भवति तदा गमनग्रासग्रहणतोयपानैस्तदानीन्तनमरणाहेतुत्वमावं विनिश्चित्य पूर्वव्याधिविनष्टत्वं ज्ञायते। अतो न प्रायश्चित्तं यदि तु पूर्वव्याधिरहित एव प्रहारजनित-
व्याधिना ग्रासादि कृत्वा म्रियते तदा प्रायश्चित्तमस्त्येव सम्वर्त्तः। यंत्रणे गो चिकित्सायां मूढगर्भविमोचने। यत्ने कृते विपत्तिः स्यात् प्रायश्चित्तं न विद्यते। औषधं स्नेहमाहारं दद्दे को

३० ब्राह्मणेषु च। प्राणिनां प्राणहत्यर्थं प्रायश्चित्तं न विद्यते। दाहच्छेदे शिराभेद प्रयत्नैरुपकुर्वतां। द्विजानां गोहितार्थं वा प्रायश्चित्तं न विद्यते। याज्ञवल्क्यः। क्रियमाणोपकारे तु मृते विप्रे न
पातकं। विपाके गोवृषाणां तु भेषज्याग्निक्रियासु च। विशेषमाहांगिराः। शृंगभंगेस्थिभंगे वा चर्म्मनिर्म्मोचनेपि वा। दशरात्रं चरेत् कृच्छ्रं सुस्था सा यदि गौर्भवेत्। मूढगर्भा हन्त मृतगर्भः
मुहुर्वैचित्ते इत्यनेन तथार्थत्वात् द्विजानां गवां च हितार्थमित्यर्थः। अत्र प्राणरक्षार्थं माहाशादिदाने मरणे दोषाभाव स्यवाचनिकत्वाद्वाल लग्नाग्न मरणेपि नात्मघातदि एवं गोपालको
गवां गोष्ठे यस्तु धूमं न कारयेत्। माक्षिकासीन नरके मक्षिकाभिः सभक्ष्यते। इति देवीपुराणदर्शि प्रज्वाल्य तत्र स्थित स्यदैवाग्निदग्निना मरणे दोषाभावः। तथा च हरिनाथ धृतसं
वर्त्त वचनं। सायंसंयमनार्थं तु न दुष्येद्रोधवन्धयोः। तत्रा स्थितस्य तव पालन निमित्त गोवधजन्य दोषः। तथा च मिताक्षरायां पराशरः। कूपे खाते च धर्म्मार्थे गृहदाहे च ये मृताः। ग्राम ३०
दाहे तथा घोरे प्रायश्चित्तं न विद्यते इदं तु वंधनरहितस्यैव पशोः कथंचिद्गृहदाहादिना मृत विषयमितरत्र प्राप्तस्त्वोक्तं। कान्तारेष्वथवा दुर्गे गृहदाहे वटेषु च। यदि तत्र विप
त्तिः स्यात् पादश्रको विधीयते। इति त्रेयं एतद्वचनं याज्ञवल्क्यस्येति मदवदेवभट्टः। चिकीत्सायां पापाभावो यथावदुपचारे वोध्यः न पुनः सान्निपातानि मृतस्योदकपानादिनाग्रतए
व मनुः। चिकित्सतांसर्वेषां च मिथ्याप्रचरतां दमः। काश्यपोप्यत्र प्रायप्रायश्चित्तमाह दोग्ध्रीदमनाति दोहनान्नासा पाशदामघंटाभरण योजनात्नैल पानौषधि पान विनियोगाद्या
पन्नानां प्रायश्चित्तं ब्राह्मणेभ्यो निवेद्य स शिरवं वपनं कृत्वा प्राजापत्यं कृच्छ्रमाचरेत्। व्रतांते गां दक्षिणां ब्राह्मणाय दद्यात्। धेनुं तिलधेनुं वा अत्र गोधेनुतिलधेनुदानानां शक्त्यपे
क्षो विकल्पः तिलधेनुमाह रत्नाकरे वराहपुराणं। तिलधेनुं प्रवक्ष्यामि सर्वपापप्रणाशिनीं। यां दत्वा पापकर्म्मापि मुच्यते सर्वपातकात्। चतुर्भिः सेतकानिश्च प्रस्थ एकः प्रकीर्त्तितः।

तेषोडशभवेद्दण्डः चतुर्भिर्वस्त्रकोभवेत्। इक्षुदंडमयाः पादा दन्ताः पुष्पमयास्तथा। नासागन्धमयी तस्याजिह्वागुडमयी तथा। पृष्ठे ताम्रमयी सास्यात् घंटाभरणभूषिता। ईदृशी
कल्पयित्वा तु स्वर्णशृंगीं प्रकल्पयेत्। कांश्योपादानरौप्यखुरां पूर्वधेनुविधानतः। तिलधेनन्ततो दत्वा द्वादश्यां नियतः शुचि। आत्मानं तारयेद्दुर्गात् नरकात्कामभाग्भवेत्। सेतिका
कुडवः स चद्वादशप्रसृतिपरिमितः चतुर्भिरिति। प्रस्थैरितिशेषः। कांश्योपदुहनं कांश्यक्रोडं। एतच्च गोः शक्तिमनपेक्ष्यैवदमनादिमरणे वोद्धव्यं। यत्तु व्यासेन। घंटाभरणदोषेण वि
पत्तिर्यदि गोर्भवेत्। कृच्छ्रार्द्धं माचरेत्तत्र दूषणार्थं हि तत्कृतं। विरेकवमनाभ्यां च संघाते योजने तथा। लग्नासंकूलपाशेन मृते पादोनमाचरेत्। इत्युक्तं। तन्नोरस्यप्रवेशेन लतादि
वंधघंटादिदोषेण मरणे ज्ञेयं। पुनर्व्यासः। औषधं लवणां चैव स्नेहं पिन्याकमेव च। अतिरिक्तं न दातव्यं कालेस्वल्पं च दापयेत्। अतिरिक्ते विपन्नानां कृच्छ्रपादो विधीयते। औ
षधे तु न दोषः स्यात्त्वेच्छयापिवते यदि। अन्यथादीयमाने तु प्रायश्चित्तीन संशयः। अन्यथा इच्छां विना। अतिरिक्तौषधदाने तेनानिच्छया स्वल्पदाने दोषाभावात्तथा व्यवहारः। भ
वदेव भट्ट हरिनाथोपाध्यायधृतं संवर्त्तवचनं। शृंगभंगे स्थिभंगे च कठिभंगे तथैव च। यदि जीवति षण्मासान प्रायश्चित्तं न विद्यते। अत्रषण्मासोत्तर मरणे तद्दोषोपशमनाय प्रा
यश्चित्तं नास्ति। तदभ्यन्तर मरणे वधप्रायश्चित्तं भवति। एवं शृंगभंगादि निमित्तक पापे पृथक प्रायश्चित्तं न कर्त्तव्यं वधप्रायश्चित्तेनैव गुरुणा प्रसंगात्तदपगमसिद्धेः। षण्मासोत्तरं
त्वशृंगभंगादिनिमित्तं पूर्वोक्तं मासार्द्धं यवपानं प्राजापत्यं वा कर्त्तव्यमिति चर्म्मनिर्म्मोचनादि विहितप्रायश्चित्तमुक्त्वा अंकनादौ तदपवादमाहतुः पराशरांगिरसौ। यथा शृंगभंगेस्थि
भंगे वा चर्मनिर्म्मोचनेपि वा। दशरात्रं चरेत्कृच्छ्रं सुस्थासा यदि गौर्भवेत्। अन्यत्राक्षमलक्ष्माभ्यां वाहनिर्म्मोचने कृते। सायं संयमनार्थन्तु न दुष्यद्रोधवंधयोः। अंकनं त्रिशूलादिकरणं।

31 लक्ष्म स्थिरलक्ष्मकरणं वा हतिर्मोचनं वाहनादितायश्चर्म्म निर्मोचनं ॥ संवर्त्तः । देवद्रोण्यां विहारे च कूपेष्वायतनेषु च । एषु गोषु विपन्नासु प्रायश्चित्तं न विद्यते । देवद्रोणी शयन्मू शिवलिं-
गाद्यवस्थानगह्वरं विहारो गवां मैथुनं आयतनं सीमानिबंधनस्थानं अत्र कूपायतनकर्त्तुरेव दोषाभावो न तु गोस्वामिनः सर्वत्रैवापालने दोषः श्रुतेः स्मृतिसागरसारे गोभिलः देवल-
गौतमौ । मुष्कमोचकरो विप्रो गोवधस्य व्रतं चरेत् । प्रयोजकस्तु कुर्वीत व्रतस्यार्द्धं विशुद्धये । हरीतो वीश कंठे वीपि वाहयेद्यो हि अवस्वयं । प्राजापत्यद्वयं कुर्यात् त्रिगुणं पोषितो गवां । हषभ-
तु सम्मुत्सृष्टं कपिलां वापि कामतः । योजयित्वा हलं कुर्य्यात् व्रतं चांद्रायणद्वयं विक्रयेद्गां विनिर्मये द्दत्वा गोमांसखादक व्रतं चान्द्रायणं कुर्य्यात् वधे साक्षाद्विधीभवेत् । मुष्कमोचकरो
बीजकोषनाशकरः । याज्ञवल्क्यः । दंडविधौ मनुलिंगच्छेदपोस्तुल्यत्वाभिधानात् प्रायश्चित्तेपि तथेति वत्सः । यथाक्षुद्रपशूनां दुःखादीनुपक्रम्य लिंगस्य छेदने मृत्यौ मध्यमो मूल्यमे- २१ प्रा
व चा महापशूनामेतेषु स्थानेषु द्विगुणो दमः । मध्यमो मध्यमसाहसो दण्डः । स तु चत्वारिंशदधिकपंचशतपलकस्तेनैवोक्तः । यथासाशीति साहस्रो दंडउत्तमसाहसः । तदर्द्धं मध्य-
मं प्रोक्तस्तदर्द्धमध्यमस्मृतः । मूल्यमिति । पशुस्वामिने च मूल्यं महापशूनां गवास्वादीना एतेषु पूर्ववचने पूर्ववचनैतद्वचनोक्तेषु गोमांसखादकेजवनादौ अत्र गवामपरायत्वेन उ-
पपातकत्वात् चान्द्रायणमुक्तं । तथा च गौतमः । पशवश्च हिंसायोग इति । अस्यार्थः । यत्र विक्रीताः सन्तः पशवो हिंस्यन्ते तत्र तेषामपरायत्वमिति प्रायश्चित्तविवेकः । अपण्यानां च
विक्रय इति मनुनोपपातकप्रकरणे पठितं । विष्णुना च । उपपातकिनस्त्वेते कुर्युश्चान्द्रायणं नराः इत्यनेन चांद्रायणं विहितं अत्र पापस्य लघुत्वात् चांद्रायणपदं शिशुचांद्राय-
णपरं । तत्पादेन वधेनु चतुष्टयेन संकलितं प्रायश्चित्तविवेकेन ॥ एतद्विषय एव चांद्रायणमकुर्वाणाः कुर्युः कृच्छ्रचतुष्टयमिति समूलत्वबोध्यं । वधे त्वसानकृतवधोक्तसार्द्ध-

धेन्वष्टकं। एतदपि गुरुत्वात् ब्राह्मणस्वामिकविषयं। तेनान्यत्र गोमांसखादकसंबन्धिविक्रयादिना चेत्त्वज्ञानकृततत्तत्स्वामिकवधप्रायश्चित्तार्द्धं वधे संपूर्णमिति। रहःकृतेषु प्रकीर्णोप
पातकानुपातकमहापातकेषु। गायत्र्याः शतसाहस्रायुतलक्षजपः कार्यः। तथा च मिताक्षरायां गायत्रीमधिकृत्य शंखेनोक्तं। शतं जप्त्वा तु सा देवी सर्वपातकनाशिनी। सहस्रं जप्त्वा
तु तथा पातकेभ्यः प्रमोचनी। दशसाहस्रजप्येन सर्वकल्मषनाशिनी। लक्षं जप्त्वा तु सा देवी महापातकनाशिनी। कल्पतरौ यमः। गायत्र्याः पादमर्द्धं वा ऋचः सर्वर्चनेवरा। ब्रह्महत्या
सुरापानं स्तुवर्णहरणं तथा। गुरुदाराभिगमनं यच्चान्यत्पातकं महत्। सर्वमेतत्पुनात्याहु स्वयं वैवस्वतो मनुः॥ बौधायनः। ॐ पूर्वं व्याहृतिभिः सर्वपातकेवाचामेत्। तस्मादेवाचम
नात् सर्वस्मात् पापात् प्रमुच्यते। अपहारे तु जाबालः। अश्वगोभूमिकन्याश्च हृत्वा चान्द्रायणं चरेत्। क्षुद्रपशून् समाहृत्य प्राजापत्यं समाचरेत्। चान्द्रायणे धेन्वष्टकं प्राजापत्ये धेनुरे
का। बालादीनामर्द्धादि। अनाहिताग्नितास्तेयमृणानां चानपक्रिया इत्यनेन मनुनोपपातकगणने महापातकानुपपातकस्तेयेतरस्तेयस्य निर्देशादाहिताग्नौ प्रायश्चित्ताहतिः स्त्रीशूद्रा
णामर्द्धं च प्रागुक्तत्वात्॥ ०॥ अथ निमित्तिनो नरवधापवादः॥ मिताक्षरायां आक्रोशादिजनितमन्युरात्मानं खड्गादिना प्रहृत्य मरणादर्वाक् आक्रोशादिकर्तारि नादिनासन्तोषितो य
दि जनसमक्षं वृद्धैः श्रावयति नाक्रोशकस्यापराध इति तदा न दोषः यथाविस्तु। उद्दिश्य कुपितो हत्वा तोषितः श्रावयेत्पुनः। तस्मिन्मृते न दोषोऽस्ति द्वयोरुच्छ्रावने कृते। द्वयोरिति-
बहूनामुपलक्षणं उच्छ्रावनमुद्घोषः॥ ०॥ अथ चाण्डालाद्यन्नभक्षणप्रायश्चित्तं। यद्यपि द्रवद्रव्यस्यैकदेशादधोनयनं पानं तच्चैकस्मिन्प्रयोगे त्वन्नेधैकं भवति तथापि नत
थाभूतोऽभ्यासोऽपेक्षितः यतः पिवतिधात्वर्थोऽभ्यासो ह्यभ्यासः। एकफलोद्देशेन प्रवृत्तिकृतिव्यापारानां चैकोपक्रमाणां व्यापारनिचयानामेकपिवतिधात्वर्थत्वं यथा एकफलोद्देशेन एक

३४

प्रयत्नोपक्रमाणां स्थालीमार्जनादीनां मोदनपरीक्षणापर्य्यन्तानां व्यापारनिचयानामेकमेकपठितधात्वर्थत्वं यथा वा प्रहारलक्षणानां भिन्नत्वेपि एकफलोद्देश्यकैकप्रयत्नोपक्रमत्वेन एक
मेव हन्तिधात्वर्थं अन्यथा प्रतिप्रहारं प्रकृतं रक्षः हत्येवमादि मंत्राहत्तिप्रसंगात्। तेनात्रापि एकफलोद्देशेन एकप्रयत्नोपक्रमणाम् अभ्यवहाराणामेकस्मिन् प्रयोगे सकृत्पानत्वेनाभ्यासः
प्रयोगभेदे त्वभ्यास एवेति सिद्धमिति॥ सुरापानेमव देव भट्टोक्तवत् चांडालाद्यन्नभक्षणेपि सकृदभ्यासविचारः प्रयोगभेदादेवाशनभेदं व्यक्तमाह कात्यायनः। मुनिभिर्द्विरसनमुक्तं
विप्राणां मर्त्यवासिनां नित्यं। अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः यद्यपि अन्नादीनां कंठादधोनयनमेव भक्षणं नतु ष्ठीवनायमुखादेः कपोलधारणं तथाविधे प्रयोगाभा
वात् तथापि पापविषये तथाविधानुबंधेपि प्रायश्चित्तं ब्रह्मवधे तथा दर्शनात् यथा याज्ञवल्क्यः। चरेद्व्रतमहत्वापि घातार्थं चेत्समागतः। अत्र हननप्रतिषेधे न तदंगभूताध्यव-
सायादेरपि प्रतिसिद्धत्वात् प्रायश्चित्तविधानं तथात्रापि भक्षणप्रतिषेधेन तदंगभूताव्यभिचारितान्नादिसंयोगस्यापि प्रतिषिद्धत्वेन दोषस्य विद्यमानत्वात् भवत्येव प्रायश्चित्तं २२ प्रा
मिताक्षरायामेवं अत्रप्युक्तं। जिघ्रन्नपि सुरां कश्चित् पिबतीत्यभिधीयते। यावन्न क्रियते वक्त्रे गंडूषस्य प्रवेशनमिति। अत्र च वक्त्रे गंडूषप्रवेशने पानातिदेशवत् भक्षणे घ्राणे
पि भक्षणातिदेशस्तत्रश्च। विप्रदंडोद्यमे कृच्छ्रस्त्वतिकृच्छ्रनिपातने इति याज्ञवल्क्योक्तदंडोद्यमे दंडनिपातप्रायश्चित्तार्थवत् भक्षणोद्यमे कंठादधोनयनसंभावनारहितेऽर्द्धं प्रा
यश्चित्तं ज्ञेयं विवेकहृतापि चरेद्व्रतमहत्वापि घातार्थं चेत्समागत इत्यत्र तथा व्यवस्थापितं तद्भक्षणप्रायश्चित्तमाङ्गिराः। अन्त्यावसायिनामन्नमश्नीयाद्यस्तु कामतः।
स तु चांद्रायणं कुर्यात् तप्तकृच्छ्रमथापि वा। अन्त्यावसायिनमाह। चांडालः श्वपचः क्षत्ता सूतो वैदेहिकस्तथा। मागधायोगवौ चैव सप्तैतेन्त्यावसायिनः। अत्र कामत एव चांद्रा

पत्नात तत्कृच्छ्रो विषमशिष्टत्वेन इच्छाविकल्पासंभवात् तथापि वेत्यनेन भवदेवभट्टोक्तसमुच्चयायोगाच्च । कामतश्चान्द्रायणं कामतस्तप्तकृच्छ्रमिति व्यवस्थितो विकल्पः । चाण्डालाद्यु
त्पत्तिमाह मनुः । क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः । वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ । शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणां । वैश्यराजन्यविप्रासु जायन्ते वर्णसंक
रा । तथा क्षत्तुर्जातस्तथोग्रात् पुक्कस इति कीर्त्यते । तथा क्षत्रियात् शूद्रकन्यायां क्रूराचारविहारवान् । क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते । एतच्चान्द्रायणं सकृद् देवभोजने आपस्तम्बे
न प्रमादत इत्यभिधानात् । चाण्डालान्नं यदा भुङ्क्ते ब्राह्मणो वै प्रमादतः । प्रायश्चित्तं कथं तत्र वर्णे वर्णे विधीयते । चान्द्रायणं चरेद्विप्रः क्षत्रः सान्तपनं चरेत् । षड्रात्रं च त्रिरात्रं च वर्णयोर
नुपूर्वशः । प्रमादोऽनवधानता इत्यमरः तथापि । ज्ञानतः ह्यते अंगिरसा कामतएव चान्द्रायणविधानात् अत एव प्रमादतः सकृदित्यर्थः इति प्रायश्चित्तविवेकः । चान्द्रायणाशक्तौ धेन्वष्टकं दे
यं स्नानास्नानाभ्यां कृच्छ्राब्दचान्द्रायणद्वयविधानात् यथा आपस्तम्बः कापालिकान्नभोक्तॄणां तन्नारीगामिनां तथा । ज्ञानात् कृच्छ्राब्दमुद्दिष्टमज्ञानादैन्दवद्वयं । कृच्छ्राब्दं त्र्यब्दं व्याप्यकृच्छ्रं प्राजा
पत्यमित्यर्थः । अस्य प्रायश्चित्तविवेके कैवर्त्ततुल्यत्वाभिधानात् स्नानास्नानाभ्यामभ्यस्तभोजने इदं प्रायश्चित्तं अभिगमने तु द्विगुणमभ्यस्ते तेयं । अत्र त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्याद
याचितं । त्र्यहं परं तु नाश्नीयात् प्राजापत्यं चरन् द्विजः इति मनुवचनात् । प्राजापत्यस्य द्वादशाहसाध्यत्वेन मासे सार्द्धप्राजापत्यद्वयात् वर्षे त्रिंशत्प्राजापत्यानि तदशक्तौ त्रिंशद्धेनवः ।
प्राजापत्यव्रताशक्तौ धेनुं दद्यात् पयस्विनीं । धेनोरभावे दातव्यं तुल्यमूल्यं न संशयः । इति संवर्त्तवचनात् धेनुमूल्यं तु कार्षापणत्रयं प्राग्व्यवस्थापितं स्यात्तत्र कामकृते यत्र द्विगुणं बु
द्धिपूर्वके इत्यंगिरोवचनात् ज्ञानतः प्रायश्चित्तं अज्ञानात् तदर्द्धप्राप्तेः तथापि चान्द्रायणद्वये पंचदश धेनवः । तन्मूल्यदाने तु सार्द्धसप्तधेनुमूल्यं सार्द्धद्वाविंशतिकार्षापणा वा

33

देयाः । एवं जलाम्युद्धं धनमप्यथाः प्रव्रज्यानशनच्युता । विप्रपतनप्रापशास्त्रघाताच्युताश्चये । सर्वते प्रत्यवसिताः सर्वधर्मबहिष्कृताः । चान्द्रायणेन शुद्ध्येयुस्तप्तकृच्छ्रद्वयेन वा इति यमवचनात्
चान्द्रायणाद्धि तुल्यत्वात् तप्तकृच्छ्रे पादोन धेनुचतुष्टयं तदशक्तौ सपादैकादशकार्षापणादेयाइति । एतच्च क्षत्रियादीनां पादपादह्रास्यात् तथा च अभक्ष्यभक्षणप्रकरणे विष्णुः । विप्रेत
सकलं देयं पादोनं क्षत्रिये मतं । वैश्येऽर्धं पादशेषं तु शूद्रजातिषु शस्यते । एवं च आपस्तम्बोक्तं क्षत्रियादीनां सान्तपनादि आपद्विषयं आपद्युक्तत्वेनापि प्रायश्चित्तह्रासदर्शनात् यथापराश
रः । आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि । मनस्तापेन शुद्ध्येत द्रुपदां वा शतं जपेत् । अन्यत्र मनुना । प्रायश्चित्ताधिकारमुक्तं । तद्यथा । राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसमित्या
द्यभिधाय भुक्त्वा चान्यतमस्यान्नममत्या क्षपणं त्र्यहं । मत्या भुक्त्वा चरेत्कृच्छ्रं रेतो विण्मूत्रमेव च । सान्तपने धेनुद्वयं कामाकामाभ्यां सान्तपनप्राजापत्ययोर्विधानात् यथा मनुः । जातिभ्रं
शकरं कर्म कृत्वान्यतममिच्छया । चरेत्सांतपनं कृच्छ्रं प्राजापत्यमनिच्छया । कृच्छ्रव्रतं च द्वौ वे धेनुरेका च द्वात्र प्राजापत्ययोस्तुल्यत्वात् यथा मन्तकुशातुराणामित्युक्त्वा मनुः । भुक्त्वा चा २२ प्रा
न्यतमस्यान्नममत्या क्षपणं त्र्यहं । मत्या भुक्त्वा चरेत्कृच्छ्रं रेतो विण्मूत्रमेव च । अंगिरा नास्त्यहमुपवासं विधाय तत्रानौ देवगुणयेन षडहं प्राप्ते प्राजापत्यं विदधाति । एवं त्रिरात्रे चतुर्विंशतिप -
णाः । प्राजापत्या तु कल्पधेनुमूल्यार्धत्वात् । एवं च प्रायश्चित्ते शूद्रस्य त्रिरात्रोपवासविधानात् । वैश्याः शूद्राश्च ये मोहादुपवासं प्रकुर्वते । त्रिरात्रं पंचरात्रं वा तेषां वृद्धिर्न विद्यते । इति
प्रायश्चित्तेतरकाम्यपरं । पुष्टिर्व्रतफलमिति रुद्रधरः । मनुः । चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च । पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति । अन्त्याः स्त्रेच्छा जनवनश्वपचाद
यः ॥ याज्ञवल्क्यः । दीपकलिकायामपि अन्त्येभ्य वा अन्त्याय ततोऽधमजातयो न सन्तीति व्याख्याते । प्रतिगृह्य अदृष्टार्थं त्यक्तद्रव्यं स्वीकृत्य तद्द्रव्यं तु वैदिककर्मणा न हि मपि यथा हारीतः । पतितद्

कृतिभ्यः प्रतिगृह्णीतमस्वर्ग्यमयज्ञीयेनतेनपुण्यधीनाप्नोति। मिताक्षरायां। योदत्तादायिनोहत्वा लिप्सेतब्राह्मणोधनं। याजनाध्यापनेनापि यथास्तेनतथैवसः। अदत्तादयिनचौरस्यपततिप्रायश्चि
त्तेतरवैदिककर्म्मानधिकारी सनरकभागीभवति। तथाचगौतमः। द्विजातिकर्म्मभ्योहानिः पतनंपरत्रवासिद्धिस्तमेकेननरकमितिहरिस्मरणादौतु विशेषवचनादेवाधिकारः॥ तथाचना
रदीये। सम्यक्सन्ध्यामुपासीत त्रिकालंस्नानमाचरन्। अध्ययनाध्यापदीर्घ्व वर्जयेत संस्मरन्हरिं। एवंचपंचैतानिमहापातकानिकृत्वाब्राह्मणाः सञ्जिनोतु संभाष्यानानुग्राह्योऽभिशस्तः
सर्वकर्म्मविवर्जितः। पतितमोभवतीतिदेवलवचनेन महापातकेपतित्याभिधानादत्रापि तथाभिधानात् तदीयप्रायश्चित्तमंगिरसोक्तंषड्वर्ष प्राजापत्यंयुक्तं। यथाषड्भिर्वर्षैः कृच्छ्रका
रीब्रह्महाविशुध्यति। वर्षे त्रिंशत्प्राजापत्यानिपूर्वमुक्तानिषड्भिर्वर्षैः साशीतिशतंप्राजापत्यानितदशक्तावशीत्युत्तराधेनुशतंदेयं तन्मूल्यंवाचत्वारिंशदधिकपंचशतकार्षापणादेया
इतिगुरुत्वादेतस्यप्रायश्चित्तस्यभोजनप्रतिग्रहयोरज्ञानादष्टचत्वारिंशदभ्यासविषयत्वं। यतः सकृदज्ञानात्तप्तकृच्छ्रविधानेनतत्रपादोनधेनुचतुष्टयं तस्याष्टचत्वारिंशद्गुणो
नसाशीतिशतंधेनवोभवन्तीति तद्भोजनस्यानिंदितान्नादानंतथेत्यनेनउपपातकगणेमनुनानिर्दिष्टत्वात् तदभ्यासेप्रायश्चित्ताधिक्यंयुक्तं। गोघ्नवद्विहितः कल्पश्चांद्रायणमथा
पिवा। अभ्यासेतुतयोर्भूयस्ततः शुद्धिमवाप्नुयात् इतियमवचनादित्यतोनतंत्रता। भोजनसाहचर्य्यात् प्रतिग्रहेपि तथाभिगमनेतुसकृदज्ञानादेवपातित्यमितिप्रायश्चित्तविवे
कः। युक्तश्चायंचांडालान्त्यस्त्रीगमनस्य अनुपातकत्वात्। यथामनुः। गुरुतल्पव्रतंकुर्य्यादेतःसिक्त्वास्वयोनिषु। सख्युःपुत्रस्यचस्त्रीषुकुमारीष्वन्त्यजासुच। विद्भिरपि अन्त्यजा
गमनादीनुपक्रम्य अनुकिनस्त्वेतेमहापातकिनोयथा। अश्वमेधेनशुध्यन्तितीर्थानुसरणेनवा। अश्वमेधप्रायश्चित्तन्तुराज्ञएवतत्रतस्यैवाधिकारात्। तथाचापस्तंबः। राजास

३५ विभौ मोऽश्वमेधेन यजताप्यसौ विभौ म इति। अश्वमेधावभृथस्नाने तु विप्रस्याप्यधिकारः। तथा च कल्पधृतं भविष्यपुराणं। यदा तु गुणवान विप्रो हन्यादिप्रं तु निर्गुणं। अकामतस्तदाग
च्छेत्स्नानं चैवाश्वमेधिकं। ततश्चावभृथस्नानं क्षत्रियविषयमिति प्रायश्चित्तविवेकोक्तं हेयं। स्त्रिया अपि तु स्वप्रायश्चित्तमाह अंगिराः। व्रतं यच्चोदितं पुंसां पतितंस्त्रीणि निषेवना
त्। यच्चापि कारयेन्मूढं पतितासेवनात्स्त्रियं। ज्ञाने तत्तुल्यतया द्विगुणव्रताचरणोऽव्यवहार्य्यः। प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्। कामतो व्यवहार्य्यस्तु वचनादिह जायते। इति याज्ञ
वल्क्यवचनात् पापाभावे कथमव्यवहार्य्यत्वमित्यत आह वचनादिति। तथा चोक्तं। किमिह वचनं न कुर्य्यात् नास्ति वचनस्येति भावः। पापस्य देशान्ती नरकोत्पादिकाव्यवहारवि
रोधिका च इति। तत्र इतरशान्तिनाशे व्यवहारविरोधिकाशान्तिर्वस्तीति भावः। तथा च मिताक्षरायामापस्तंबः। नास्यास्मिन लोके प्रत्यासत्तिर्विद्यते कल्मषन्तु विहन्यते इति अत एव २४
पापान्तरेऽव्यवहार्य्यत्वं। याज्ञवल्क्येनोक्तं। शरणागतवालस्त्रीहिंसकान्संवसेन्न तु। चीर्णव्रतानपि सदा कृतघ्नसहितानिमान्। कामतो महापातकादिकृतपापकर्त्तुरव्यवहा
र्य्यत्वदर्शनात्। कामतो वहुतरगुणयुक्तशरणागतादिहननवशामव्यवहार्य्यत्वं याज्ञवल्क्येनोक्तं। ननु हीनगुणहन्तॄणां अन्यथा विषमशिष्टत्वापत्तेः अत एव शक्रस्त्रीणाम
प्यवध्यत्वमाह मत्स्यपुराणं। यदि त्वमिच्छसे वैरं पुरुषेष्वपकारिषु। स्त्रियः किमपराध्यन्ति गृहपंचरकोकिलाः। किं त्वपनेश्रुतं लोके अवध्याः शक्रयोषितां। यद्यप्येवं त
थापि स्त्रीहिंसकानीति हीनवर्णोपभुक्ताघातकेतरपरं। हीनवर्णोपभुक्ता या त्याज्या वध्यापि वा भवेत् इति वृहस्पत्युक्तेः। अकामतः स्त्रियं हत्वा ब्राह्मणीं वैश्यवच्चरेत्। कामतो
द्विगुणं प्रोक्तं प्रदुष्टायां न किंचनेति। व्यासोक्तेश्च। वैश्यवत् वैश्यहत्याव्रतवत्। एतेन यद्यपि व्यभिचारिस्त्रीवधे अल्पमेव प्रायश्चित्तं तथापि वाचनिकोऽयं व्यवहारप्रतिषेध

षेध इति मिताक्षरोक्तं न युक्तिसहं। केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः। युक्तिहीनविचारे तु धर्म्महानिः प्रजायते इति बृहस्पत्युक्तेः। पापे गुरुगुरूणि स्वल्पान्यल्पे च तद्विदः। प्राय
श्चित्तानि मैत्रेय जगुः स्वायंभुवादयः इति विष्णुपुराणाच्च। एवं च हीनवर्णोपपुत्राद्याः परित्यागविधानेन प्रत्यन्तपातित्याभिधानेन ज्ञानतस्तदुपभोक्तुः। पत्युरपि संसर्गित्वेन सद्यःपातित्वं जा
नन्त्रिस्तुपक्रम्य। याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनं। कृत्वा सद्यः पतन्त्येते पतितेन न संशयः। इति देवलवचनात्। अज्ञानतस्तु वारद्वयेन। यत्तु पतितस्त्रीगमनस्य संसर्गस्थलद्युत्वं
प्रायश्चित्तविवेककृद्भिरुक्तं। तदप्यपरं प्रतएव तैरेव स्तेयादिना पतिते त्युपक्रम्य उक्तं तत्र अज्ञानतो वत्सरेण पातित्वं। संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद्यौनादेकशय्ये
कभोजनादिति हारीतवचनात्। ज्ञानतो वत्सरोर्द्धेन इति तदसंश्रद्धेयं दोषाभावस्य वाधकोपि पृथग्भूत्वा तत्पापं नाप्नुयात् किंचिदिति देवलवचनात्। पाद्मवल्क्यदीपकलिकायां कृतघ्नमा
सस्कंदपुराणं॥ ब्रह्मघ्ने च सुरापे च चौरे च गुरुतल्पगे। निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः। भर्तृपिंडापहर्त्ता च पितृपिंडापहारकः। तस्मात् गृहीत्वा विप्रो च दक्षिणां न प्रय
च्छति। पुत्रान् स्त्रियाश्च यो द्वेष्टि यश्च तान् घातयेन्नरः। कृतस्य दोषं वदति सकामानन करोति यः। नस्मरे सत्कृतं यस्तु आश्रमान् यस्तु दूषयेत्। सर्वांस्तान् ऋषिभिः सार्द्धं कृतघ्नान् ब्रवीन्म
नुः। तस्मात् पित्रादिगुरोः कृतस्य सत्कर्म्मेणा इति शेषः। सकामानन करोति कृतस्य कर्त्तॄनिति शेषः। यत्तु विष्णुपुराणं। चंडालान्नं भुक्त्वा त्रिरात्रमुपवसेत् सिद्धं भुक्त्वा पराक इति तद्
लाज्ञो जन विषयं इति प्रायश्चित्तविवेकः। वलात्प्रवर्त्तमानस्य विषयत्वात् न मस्त्येव स्वारसिकत्वाभावात् तथाकारित्वं किन्त्वज्ञानकृतपापात् तत्र युक्तं पापाधिक्यमित्याशयः। त्रिरा
त्राद्यामन्नविषयं। परत्र सिद्धमित्युक्तेः पराकमाह मनुः। यतात्मनो प्रमत्तस्य द्वादशाहमभोजनं। पराको नाम कृच्छ्रोयं सर्वपापापनोदनः। तेनात्रामान्ने सिद्धान्ने प्रायश्चित्ते तुरीयभागवि

35 धानात् अज्ञानादाव पितुरीयभागकल्पनेति। पराकेपंचधेनवः पराकस्यपंच प्राजापत्यतुल्यत्वात् यथांगिराः। षड्भिर्वर्षैः कृच्छ्रचारीब्रह्महातुविशुध्यति। मासिमासि पराकेन त्रिभिर्वर्षैर्व्य
पोहति। अत्रषड्भिर्वर्षैः साशीतिशतप्राजापत्यानि पूर्वमुक्तानि तथाप्रतिमास्येकैकपराकेन वर्षैर्द्वादशपराकाः वर्षत्रये षट्त्रिंशत्पराकाशीत्युत्तरप्राजापत्यशतयोः प्रत्येकं ब्रह्मवधपापक्ष
येककार्यकारित्वात्तुल्यत्वं षट्त्रिंशतश्चाशीत्युत्तरशतं पंचगुणं भवतीत्यतः प्राजापत्यपंचकतुल्यः पराकः। शुष्कान्नेपक्वान्नादर्द्धं प्रायश्चित्तं विष्णुधर्मोत्तरदर्शनात्। तथायैस्तत्र
भुक्तंपक्वान्नं कृच्छ्रार्द्धं तस्यनिर्दिशेत्। शुष्कान्नभोजिनः पादमित्याह भगवान्मनुः। तस्याविज्ञातचांडालसहितैकवेश्मस्यशंकरीकरणारूपमूलपापकर्त्तुर्द्वितीयसंसर्गिनः तथाचाप
स्तंबः। अन्त्यजातिरविज्ञातोनिवसेद्यस्यवेश्मनि। सवैज्ञात्वातुकालेनकुर्यात्तत्रविशोधनं। चांद्रायणंपराकोवाद्विजातीनांविशोधनं। प्राजापत्यन्तुशूद्राणांतथासंसर्गदूषणे। ये
स्तत्रभुक्तंपक्वान्नं कृच्छ्रं तेषांविनिर्दिशेत्। तेषामपिचयैस्तैर्भुक्तं कृच्छ्रपादोविधीयते। तत्रतृतीयसंसर्गिण एवप्रायश्चित्तदर्शनाच्चतुर्थेसंसर्गेदोषोनास्ति प्रायश्चित्तविवेकोप्येवं ॥ ३५ प्रा
शैरवः। शूद्रान्नंब्राह्मणोभुक्त्वा तथारंगावतारिणः। चिकित्सकस्यक्रूरस्यतथास्त्रीमृगजीविनः। चांडालान्नंभूमिपान्नं अजजीविस्वजीविनां। शौंडिकान्नंसूतिकान्नंभुक्त्वामासंव्रती
भवेत्। अजाजजीविस्वजीविनानिर्दिष्टश्रवणात्। मार्जारकुक्कुटच्छाग श्ववराहविहंगमान्। पोषयन्नरकंयातितमेवद्विजसत्तमेइतिविष्णुपुराणवचनमपिजीविकार्थपोषणपरं
तंरोगमूपवहन्नरकं व्रतीयावकेनेति प्रायश्चित्तविवेकः। मासयावकाहारेधेनुद्वयंगोवधेउक्तं। एतत्कृच्छ्राद्यादावभ्यासाभ्यासाभ्यां यथासंभवविषये। शौंडिकान्नस्यज्ञानतः सकृद्भोज
नेधेनुद्वयं। यत्तुमनुवचनं। श्वपचांशौंडिकानांचचेलनिर्णेजकस्यक। रजकस्यनृशंसस्ययस्याश्चोपपतिर्गृहे। भुक्त्वाचान्यतमस्यान्नममत्याक्षपणाऽत्र्यहमितित्रिरात्रोपवासविधा

यकं। एवं तुरीयांशमपि नियमोपि संगच्छते। लघुप्रायश्चित्तात्त्वहूनि हीनद्विजपरमिति प्रायश्चित्तविवेकः। चांडालान्ने तु प्रायश्चित्तलाघवात् सकृदन्नानापद्युक्तोत्तादिविशिष्टविषयं। त
था चउत्तरादपि पापक्षयमाह मनुः। अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता। अज्ञानाद्भुक्तमुत्तार्य्यं शोध्यं वाप्याशु शोधनैः। प्रमादाद्भुक्तवमितव्यं तदसंभवे यथोक्तप्रायश्चित्तैः शोध
नीयं। वमनपक्षेपि अल्पप्रायश्चित्तं। भवत्येव विष्णुसूत्रे तथा दर्शनात् तद्यथा आमश्राद्धाशने त्रिरात्रं पयसा वर्त्तेत ब्राह्मणः शूद्रोच्छिष्टाशने च मनं कृत्वा सप्तरात्रमिति। आमश्राद्धं
गर्हितैर्यत् क्रियते तदशने पयसा क्षीरेण अत्रापि आपूर्वे दोक्तपरिभाषा पयः सर्पिः प्रयोगेषु गव्यमेव विधीयते। विशेषो यत्र नोक्तः स्यादेष तत्र विधिः स्मृतः। एवमुच्छिष्टे यः पराकउ
क्तौ ंगिरसा सोपि सकृदादिविषये बोध्यं। विष्णुना अनुच्छिष्टेपि पराकोक्तः। तथा चांगिराः। चांडालपतितादीनामुच्छिष्टान्नस्य भक्षणे। द्विजः शुद्ध्येत्पराकेन शूद्रः कृच्छ्रेण शु
ध्यति। यत्तु मिताक्षरायां आपस्तंबः। अन्त्यानां भुक्तशेषन्तु भक्षयित्वा द्विजातयः। चांद्रं कृच्छ्रं तदर्द्धं च ब्रह्मक्षत्रविशां विधिः। चांद्रं चांद्रायणं कृच्छ्रं तप्तकृच्छ्रं। तद्ब्राह्म
णस्य सकृदन्नानविषयं वत्वात् कारात् अनुत्तारेपि अन्येतरत्तांबूलाद्युच्छिष्टपरं च अत्राज्ञाने आपस्तंबेन उच्छिष्टचांद्रायणविधानात्। अंगिरसानुच्छिष्टे तप्तकृच्छ्रविधानादे
व सर्वत्र अनुच्छिष्टाद्युच्छिष्टे द्वैगुण्यं बोध्यं प्रायश्चित्तविवेके संसर्गप्रकरणेप्येवं। क्षत्रियविशश्च पदितेयं अंगिरोवचने पतितपदस्य सर्वधर्म्मबहिष्कृतवाचिनः प्रायश्चित्त
गौरवेण चांडालजातिसाहचर्य्येण जवनादिम्लेच्छवाचित्वं नतु ब्रह्महादिपतितवाचित्वं। तत्र सकृदुच्छिष्टाशने स्वल्पप्रायश्चित्तात्। अतएव ब्रह्मघ्नोच्छिष्टाशने ज्ञानान्मासत्रयादे
वसाम्यं प्रायश्चित्तविवेककृद्भिः संसर्गप्रकरणोक्तं। अवज्ञानेन द्वादशवारान्तथेति (जवनानां शिरः सर्वं कं वाजानां तथैव च। पारदाश्च केशाश्च पह्लवाः श्मश्रुधारिणः। निःस्वाध्याय)

३८ जवनादीनान्तु सर्वधर्म्मराहित्यमुक्तं हरिवंशे सगरस्तां प्रतिज्ञां च गुरोर्वाक्यं निशम्य च। धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह। अर्द्धं सकानां शिरसो मुंडयित्वा व्यसर्जयत्। जवनानां शिरः
सर्वं कंबोजानां तथैव च। पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः। निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना। शकाजवनकांबोजाः पारदाः पह्लवास्तथा। कोलिसर्पाः समहि-
षाः दर्वाश्चोलाः सकेरलाः। वशिष्ठवचनाद्राजन् सगरेण महात्मना। शकानां शकदेशोद्भवानां क्षत्रियाणां एवं जवनादीनामिति। अत्र जवनशब्दस्तद्देशोद्भववाची चवर्गतृतीयादिः
जवनो देशवेगिनोरिति त्रिकांडशेषाभिधानदर्शनात्। तेषां म्लेच्छत्वमप्युक्तं। विष्णुपुराणे तथा कृतान् जवनादीनुपक्रम्य ते चात्मपरित्यागात्। सर्वे ते म्लेच्छतां ययुरिति बौधायनः। गो
मांसखादको यश्च विरुद्धं बहु भाषते। सर्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते। अत एव चांडालेन सह म्लेच्छानां साम्यमाह देवलः। दासीकृतो बलात् म्लेच्छैश्चांडालाद्यैश्च दस्युभिः
अशुभं कारितः कर्म्म गवादेः प्राणिहिंसनं। उच्छिष्टमार्जनं चैव तथा तस्यैव भक्षणं। खरोष्ट्रविड्वराहाणामामिषस्य च भक्षणं। तत्स्त्रीणां च तथा संगस्ताभिश्च सह भोजनं। मासो २६ प्रा
षिते द्विजातौ तु प्राजापत्यं विशोधनं। चांद्रायणं त्वाहिताग्नेः पराकस्त्वथवा भवेत्। चांद्रायणं पराकं वा चरेत् संवत्सरोषितः। संवत्सरोषितः शूद्रः मासार्द्धं यावकं पिबेत्। मा
संविप्रोषितः शूद्रः कृच्छ्रपादेन शुध्यति। विप्रोषितो विशेषेण प्रकर्षेणोषितस्तथा। ऊर्द्ध्वं संवत्सरात् कस्य प्रायश्चित्तं द्विजोत्तमैः। संवत्सरैश्चतुर्भिस्तु तद्भावं सोधिगच्छति। ह्रा
सो न विद्यते तस्य प्रायश्चित्तं ईरितम्। तदिह म्लेच्छचांडालाद्यैर्दस्युभिर्यदा अनाहिताग्निर्द्विजातिरुच्छिष्टमार्जनोच्छिष्टभक्षणखरोष्ट्रविड्वराहमांसभक्षणम्लेच्छस्त्रीसंगत
दीपस्त्रीभोजनादि कृतासित कर्म्म मासैकं कारितस्तदा तेन प्राजापत्यं साग्निना तु चांद्रायणं कार्य्यं क्षत्रियवैश्याभ्यां पराकव्रतं। अनाग्निना तु ब्राह्मणेन दासकरणे चांद्रायणं कार्य्यं

इतराभ्यां पराकः। शूद्रेणात्र मासैकदास्ये कृच्छ्रपादव्रतं संवत्सरैकदास्ये मासार्द्धं यावकपानं संवत्सरादूर्द्ध्वं वत्सरचतुष्टयं यावत् भागेरेण प्रायश्चित्तमूहनीयं। तदूर्द्ध्वं तत्समत्वेन पति
तत्वात् प्रायश्चित्ताभावात्। मरणान्तिमिति यत् प्रायश्चित्तविवेकोक्तं तत्पापाधिक्यसंभवे प्रायश्चित्तलाघवात् अनुपनीतावर्षाभ्यन्तरबालविषयं। चतुर्थवत्सरात् ऊर्द्ध्वमष्टमे यावद्देवद्वि
शिशोर्व्रतप्रकृत्विग्गुरुसंबन्धिबान्धवा इति ब्रह्मपुराणीयमप्येतत्परमपि तच्चापि जातमात्राहिताग्नित्वसंभवः। तथा च जाबालः। जाते कुमारे ऽररणिं मथित्वा तस्मिन्नाप्युष्यहोमान् जुहोति
तस्मिन् चूडाकरणोपनयनव्रतादेशगोदानक्रियास्तस्मिन्नेव समनमुपहरेयुः। सभ्याल्लाग्निरिति। यत्तु कुमारवचनं जातमात्रः शिशुस्तावत् यावदष्टौ समवायः स हि गर्भसमज्ञेयो व्यक्ति
मात्रप्रदर्शकः। भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते। तस्मिन् काले न दोषः स्यात् स यावन्नोपनीयत इति तदुक्तव्यतिरिक्तात्यपापपरं। अष्टवर्षग्रहणमनुपनीतस्यापि परस्तात्
दोषार्थं उपनयनपदं च पंचवर्षाद्युपनीतस्य वर्षाष्टकेभ्यः प्रागपि दोषज्ञापनार्थं प्रायश्चित्तविवेकेऽपि। सुरापाननिषेधोऽयं जात्याश्रय इति स्थितिः। न पिबेत् ब्राह्मणो मद्यं निषिद्धमपि
नापरमिति कुमारवचनोत्तरदर्शनात्। पूर्ववचनं मद्येतरमित्युक्तं तथा च स्मृतिः। स्यात् कामचारभक्षोक्तिर्भहृतःपातकाद्दते। ततश्चापतितान्नं तु योभुंक्ते स प्राशयुदकवसेत् ।
पानीयपानश्चापि कुशवारि पिबेत्त्र्यहमित्यंगिरोवचनमपि शूद्रान्नं ब्राह्मणो भुंक्त्वा इत्यादि शंखवचनसमानविषयं। अतएव सप्ताहादकतासोधेनुद्वये संकलितः। प्रायश्चित्त
विवेके कृता इति। एवं तत्त्वपाणीयपाने ऽंगानादौ तत्त्ज्ञेजनप्रायश्चित्तपादो बोध्यः। गायत्र्यादिरहिताग्रश्चाहृहारकान्त्यजपुरोहितादिरूपपतितब्राह्मणान्नभक्षकपरं वा अंग
गिरोवचनं। तेषां वधे अत्यन्तलघुप्रायश्चित्तश्रुत्यास्य तथा च कल्पतरौ भविष्यपुराणं। यदात्यन्तं गुरौ हीनो गायत्र्या च विवर्जितः। निहतः कामतश्चैव तदा यत्स्यान्निबोध मे ।

३७ हत्वा यदा समर्थश्चेन्न चेदं परिकल्पयेत्। वशिष्ठेन यदा रथ्यातं ब्रह्महत्याव्यपोहनं। द्वादशरात्रमभ्यस्तो द्वादशरात्रमुपवसेदिति। यत्तु प्रायश्चित्तविवेककृता ऽप्यत्र ब्रह्महा संवत्स
रं कृच्छ्रं चरेत्। पूर्णे संवत्सरे हिरण्यजगोमणिहृष्यान्नतिलभूमिसर्पींषि ब्राह्मणेभ्यो दद्यादिति स मन्त्रोक्तप्रायश्चित्तमुक्तं। तत्सामर्थ्यपरं। भोजनवत्तदभिगमनरूपसंसर्गेऽप्येवं॥ ॥अथान्त्यज
स्त्रीगमनभोजनप्रतिग्रहप्रायश्चित्तं॥ ०॥ तत्र संवर्त्तः। नटीं शैलूषिकीं चैव रजकीं वेणुजीविनीं। गत्वा चान्द्रायणं कुर्य्यात्तथा चर्म्मोपजीविनीं। कामतस्तु यदा गच्छेत्तच्चरेत् चान्द्रायणा
द्वयं चान्द्रायणोधन्वष्टकं। शैलूषिकः कृत्यन्वेषी नटानां यः स तु शैलूषिकः स्मृत इति ब्रह्मपुराणोक्त इति प्रायश्चित्तविवेक इति। यत्तु मनुवचनं। रजकश्चर्म्मकारश्च नटो वरुड एव
च। कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः। एतेषां तु स्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति इति पातित्यविधायकं तद्रजकादीनां प्रा
गुक्तमनुवचने शौण्डिकतुल्यत्वात्। शौण्डिके प्रागुक्तशंखवचनं यावकपाराविधानात्। तस्य प्राजापत्यद्वयसंकलनात्। वहूनामेकधर्म्मीणामिति बौधायनवचनात्। एतेष्वपि त ३७ प्रा
थाकल्पनात्। अज्ञानतः सकृद्भोजने प्राजापत्यद्वयं ततश्चाज्ञानात् यत्पातित्यमभिहितं तन्नवतिवारभोजने ज्ञेयं पतितत्वात्। द्वादशवार्षिकप्रायश्चित्ताहतोज्ञानतस्तु कृतेऽपि प्राय
श्चित्ते ऽव्यवहार्य्यता। अन्यथा तत्संसर्गिणां प्रायश्चित्तव्यवस्थानं स्यात्। प्रतिग्रहेऽप्येवं। अभिगमने तु चतुर्विंशतिवारादज्ञानात् पातित्यं ज्ञाने तु साम्यमिति चाण्डालस्पृष्टोदके ष्वपि
राः। यस्तु चाण्डालसंस्पृष्टं पिवेत्तोयमकामतः। स तु सान्तपनं कृच्छ्रं चरेच्छुद्ध्यर्थमात्मनः। सान्तपनमाह याज्ञवल्क्यः। कुशोदकं च गोः क्षीरं दधि मूत्रं शकृद्घृतं। प्राश्यापरेद्युरु-
पवसेत् कृच्छ्रं सान्तपनं चरन्। एतद्व्यसाध्यं तदशक्तौ षडुपवासस्तृतीयभागात् पुराणोक्तो देयः। चाण्डालादिस्पृष्टान्नभक्षणे तु प्राजापत्यं। अमेध्यपतितचाण्डालपुक्कशरजस्वला अव

धृतकानकुष्ठिकृतरविपृष्ठान्नानिभुक्त्वा कृच्छ्रमेवाचरेत् । इति शंखवचनात् । एतत्सकृदज्ञानविषयं । तथानटनर्त्तकतक्षाराश्चर्म्मकारःसुवर्णकृत । एतेषामेव सर्वेषां प्रायश्चित्तमनुमार्गतां
भिक्षान्नमुपभुंजानो द्विजश्चांद्रायणं चरेत् । एतदत्यन्ताभ्यासे अनभ्यासे तु भुक्त्वातोऽन्यतमस्यान्नममत्याक्षपरांत्र्यहमिति प्रायश्चित्तविवेकधृतवचनात्सर्वस्याइति । एवं प्रायश्चि
त्तमधिकृत्य बालस्याशक्तस्य वा तत्पिताऽनध्याय मनसा सर्वकर्म्माणि कुर्वीत पितुरभावे पति आचार्य्य इति पैठीनसिवचनात् । रोगी वृद्धस्तु पौगंडः कुर्वन्त्यन्यैर्व्रतं सदा इति ब्रह्मपु
राणाच्च । अशक्तौ अन्यप्रायश्चित्तं अन्येन कार्य्यं । अनध्यायमनसा तदीयपापं मनसा संकल्प्य इत्यर्थः ॥ ० ॥ तदयं संक्षेपः ॥ चाण्डालाद्यन्नभक्षणे धर्मैकशरणद्योतन संभावनार
हिते प्रायश्चित्तार्द्धं चाण्डालाद्यन्नभक्षणे तत्र कृच्छ्रमज्ञानात् तदशक्तौ पादोनधेनुचतुष्टयं सपादैकादशकार्षापणा वा देयाः । चान्द्रायणमज्ञानात् तदशक्तौ धेन्वष्टकं सार्द्धद्वाविंश
ति कार्षापणा देयाः पराको बलात्कारे तदशक्तौ पंचधेनवः पंचदश कार्षापणा वा देयाः । सर्वत्र उच्छिष्टत्वे व्रतद्वैगुण्यं । आपद्यज्ञानतो भुक्तौ चारिते मासयावकव्रतं तदशक्तौ धेनुद्वयं
षट्कार्षापणा वा देयाः । अनोच्छिष्टत्वे पराक इति । अभ्यासभेदे तु आवृत्तिरूहनीयाः । शूद्रपक्वान्ने सर्वत्रार्द्धं । जलमात्रयोः सर्वत्र तुरीयांशः चंडालस्पृष्टोदकपाने द्व्यहसाध्यं
सान्तपनं । तदशक्तौ कार्षापणौ को देयः । अज्ञानात् चांडालस्पृष्टान्नभक्षणे प्राजापत्यं तदशक्तौ धेनुरेका कार्षापणात्रयं वा देयं । ज्ञानतः प्राजापत्यद्वयं एतच्च ब्राह्मणस्य क्षत्री
यादीनां पादपादहानिः । स्त्रीबालवृद्धरोगिनामर्द्धं एकस्यउभयधर्म्मवत्वे पादः । रजकाद्यन्नभक्षणेऽज्ञानात्प्राजापत्यद्वयं षट्कार्षापणा वा देयाः । नवतिवारभक्षणे -
पातित्यात्महापातकवत् कृते द्वैगुण्येन प्रायश्चित्तमेव कार्य्यता जलमात्रयोः सर्वत्र पादः स्त्रीगमनेपि चांडालादावज्ञानात् सकृद्गमने पातित्यं । ज्ञानात्प्रायश्चित्ते कृते अव्यवहार्य्य

38 ता। रजकादौ च सकृद्दत्तान्नात् चांद्रायणं ज्ञानात् चांद्रायणद्वयं। तदशक्तौ पूर्वसंकलनं यथायथं। चतुर्विंशतिवारादज्ञाने पातित्यं ज्ञाने तु द्वादशवारात्पातित्यं चतुर्विंशतिवारात्साम्यं कृते
पि द्वैगुण्येन प्रायश्चित्ते व्यवहार्य्यता महापातके द्विगुणप्रायश्चित्तस्य व्यवहार्य्यतादर्शनात्॥ ०॥ अथ गोमांसादिभक्षणप्रायश्चित्तं॥ सुमन्तुः। गोमांसभक्षणे प्राजापत्यं चरेदिति
इदमज्ञानतः सकृद्भोजनविषयं तत्प्रायश्चित्तान्ते पुनरुपनयनमाह विष्णुः। ग्रामकुक्कुटनरगोमांसभक्षणे सर्वेष्वेव द्विजानां प्रायश्चित्तान्ते भूयः संस्कारं कुर्य्यादिति प्राजापत्ये धेनुरे
का कार्षापणत्रयं वा देयं। चण्डालान्नभक्षणे प्रायश्चित्तप्रकरणोऽपनयनं चांद्रायणसममिति शूलपाणिमहामहोपाध्यायसंकलनात्। तन्निमित्तसंस्काराशक्तौ धेन्वष्टके सार्द्ध
द्वाविंशतिकार्षापणा वा देयाः। शंखः। ग्रामस्वकुक्कुटरोष्ट्रौ च सर्वं पंचनखं तथा। क्रव्यादं कुक्कुटं ग्राम्यं कुर्यात्संवत्सरं व्रतं। तथेति एतान्भुक्त्वा इत्यर्थः। एतच्च चिरकालाभ्यासे संवत
सरव्रते पंचदश धेनवः पंचचत्वारिंशत्कार्षापणा वा देयाः। अभ्यासे प्राजापत्यहानिः। तत्तुल्यव्रतान्तरं वा संस्कारस्तु सकृदेवेति हारीतः। मत्स्यकंटकसंबूकशंखशुक्तिक २८ प्रा
पर्द्दकान्। पीत्वा नवोदकं चैव पंचगव्येन शुध्यति। नवोदकं नवखातजलं वर्षोदकं च तथा च ब्रह्मपुराणं। नवखातजलं गावो महिषश्छागयोनयः। शुध्यन्ति दिवसैरेव दशभि
र्नात्र संशयः। मिताक्षरायां स्मृतिः। कालेन वोदकं शुद्धं न पातव्यं च तत्त्र्यहं। अकाले तु दशाहं स्यात् पीत्वा नाद्याद्दहर्निशं। काले वर्षाकाले। शंखः। स्नानमाचमनं दानं देवतापितृत
र्पणं। शूद्रोदकैर्न्न कुर्वीत तथा मेघाद्विनिःसृतैः। पानादीतरस्पर्शादौ हरिवंशः। अभौममम्भो विसृजन्ति मेघाः पूतं पवित्रं पवनैः सुगन्धि। जाबालः। केशकीटावपन्नं च पक्षिभिः पृष्टं त-
थैव च। श्वोदक्याशूद्रसंस्पृष्टं पंचगव्येन शुध्यति। भुक्त्वा इति शेषः। अवपन्नं केशादिभिः सहपक्वं श्वोशूद्राः पंचगव्येनेति तन्मात्रपानमव्रतरूपत्वात्तेन न तत्पीत्वा उपवसेत तदशक्तौ

अष्टोपस्थादेयाः॥ अथ स्वभार्य्यामातृवतादिना वदतः प्रायश्चित्तं॥ स्मृतिसागरे यमः। क्रोधान्मोहाद्वदन्भार्य्यां मातरं भगिनीमपि। प्राजापत्यव्रतं कुर्य्यात् सर्ववर्णेष्वयं विधिः। त्यागानन्त
र संग्रहे मत्स्यपुराणे। क्रोधाद्यदि त्यजेद्भार्य्यां वयःस्थां च गुणाधिकां। ऋषिचांद्रायणं कृत्वा पुनः संग्रहमादिशेत्॥ याज्ञवल्क्येन त्वपत्रदंडविधानात् प्रायश्चित्तं सूचितं। यथा। अयुक्तस्वपथं
कुर्वन्नयोग्यो योग्यकर्म्मकृत्। वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिरोधकृत्। साधारणस्यापलापी दासीगर्भविनाशकृत्॥ पितृपुत्रस्वसृभ्रातृदंपत्याचार्य्यशिष्यकाः। एषामपतितानां चन्या
गी च शतदंडभाक्। अयुक्तसपथं कुर्वन्निति स्वभार्य्यां प्रति यदि त्वां गच्छामि तदा मातरमेव गच्छामि इत्यादि शपथकर्त्तेति। शूलपाणिमहामहोपाध्यायाः॥ ०॥ अथ यज्ञोपवीतच्छेदन
प्रायश्चित्तं॥ कामरूपीयनिबंधे स्मृतिसागरसारे आपस्तंबः। ब्राह्मणो न यदा देवाच्छिन्नं यज्ञोपवीतकं। मनस्तापेन शुद्धिः स्यात् आपस्तंबो ब्रवीन्मुनिः। प्राणायामत्रयं कृत्वा निराहारः क्षि
पेद्दिनं। वृहन्मनुः। उपवीतं ब्राह्मणस्याच्छिन्नं शूद्रेण कल्मषः। अन्नदादायमंत्रेण जपन्नुपवसेद्दिनं। अनादेशे गायत्रीमिति वचनात् अनादिष्टे शतमिति वचनाच्च शतावृत्तिगाय-
त्रीजपं कृत्वोपवसेत्। ऋष्यशृंगः। चंडालैः श्वपचैर्वापि छिन्नं यज्ञोपवीतकं। मुनिभिस्तु विनिर्द्दिष्टं महासान्तपनद्वयं। महासान्तपनमाह याज्ञवल्क्यः। कुशोदकं च गोक्षीरं द
धिमूत्रशकृद्घृतं। प्राश्यापरेद्युरुपवसेत् कृच्छ्रं सान्तपनं चरन्। पृथक्सान्तपनद्रव्यैः षडहः सोपवासकः। सप्ताहेन तु कृच्छ्रोयं महासान्तपनं स्मृतः। सप्ताहसाध्यमहासान्तपनो
धेनुद्वयसमानं इति प्रायश्चित्तविवेकः। शूद्रस्य प्रायश्चित्तमाह वृहस्पतिः। शूद्रेणा तु यदाच्छिन्नमुपवीतं द्विजन्मनां। दंडं त्रिंशत्पलं दत्वा प्राजापत्येन शुद्ध्यति। प्राजापत्यं
धेनुदानसमानं तन्मूल्यं कार्षापणत्रयं वा देयं॥ ०॥ अथ रेतोमूत्रपुरीषभक्षणप्रायश्चित्तं॥ अरेतस्यानामपेयानामभक्षाणां च भक्षणे। रेतोमूत्रपुरीषाणां शुद्धौ चांद्रायणं चरेत्।

३९ गोतमः॥ अप्रमत्यपाने पयोघृत मुदकं वायुं वा प्रति त्र्यहं पिबेत्। सत प्तकृच्छ्रस्ततः संस्कारः मूत्रपुरीषरेतसां प्राशने चैवमिति वा युतप्त दुग्धं वा स्यं। सोऽयं द्वादशा साध्यस्तप्तकृच्छ्रचा
न्द्रायणा स प्तकृच्छ्रयोर्ज्ञानाज्ञानाभ्यां व्यवस्था संस्कार स्तूभयत्रैव चान्द्रायणे धेन्वष्टकं। तप्तकृच्छ्रे धेनुचतुष्टयं। उपनयनं चान्द्रायणासमं प्रायश्चित्त विवेककृता चांडालान्नभक्षणप्रायश्चि
त्ते तथा संकलितत्वात् उपनयन करणेतु विशेषयति मनुः। वपनं मेखलादंडो भैक्ष चर्य्य व्रतानि च। निवर्तंते द्विजातीनां पुनःसंस्कार कर्म्मणि। तत्र स्वाध्याय दिनापेक्षापि नास्तीत्याह यमः॥
विप्रस्य क्षत्रियस्यापि मौंजिस्यादुत्तरायणे। दक्षिणे पि विशां कार्य्या नानध्यायेन संक्रमे। अनध्याये पि कुर्वीत यस्य नैमित्तिकं भवेत्। अपि ना दक्षिणायण कृष्णपक्षयोः समुच्चयः। मलमास
मासदोषो प्यत्र नास्ति प्रायश्चित्तरूपत्वेन प्रतिप्रसूतत्वात्। तथा च दक्षः। नैमित्तिकानि काम्यानि निपतन्ति यथा तथा। तथा तथैव कार्य्याणि न कालस्तु विधीयते॥ संवर्तः। विण्मूत्र भक्षणे वि २८ प्रा
प्रः प्राजापत्यं समाचरेत्। एतद्बलात्कार विषयमिति प्रायश्चित्त विवेकः। वस्तुतस्तु अज्ञानात् बलात्कारे आधिक्यं प्राक् प्रतिपादितं। अनड्ने कादशवर्षीयबाल विषयकमिदं। क्षत्रि
यादौ पादपादह्रानिः॥ अथोच्छिष्टस्य चांडालादिस्पर्शप्रायश्चित्तं। आपस्तंबः। भुक्त्वोच्छिष्टस्तु ना चान्तश्चांडालैः श्वपचेन वा। प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्याद्विशोधनं। गायत्र्यष्ट
सहस्रन्तु द्रुपदां वा शतं जपेत्। त्रिरात्रोपोषितो भूत्वा पंचगव्येन शुध्यति। भुक्तोच्छिष्टे ऽन्त्यजैः स्पृष्टः प्राजापत्यं समाचरेत्। अर्द्धोच्छिष्टे स्मृतः पादः पाद आमाशने तथा। अर्द्धोच्छिष्टो
येन आद्यग्रासः प्रास्ये निःक्षिप्तो न निगीर्णः। दक्षश्च। पाने मैथुनसंसर्गे तथा मूत्रपुरीषयोः। संस्पर्शं यदि गच्छेत्तु श्वा वोदक्यान्त्यजैः सह। दिनमेकं चरेन्मूत्रे पुरीषे च दिनद्वयं। दिनत्रयं मै-
थुने च पाने स्यात्तु चतुष्टयं। काश्यपः। श्वसृगाल कवान्य चांडाल मद्य भांड रजस्वलाः। यद्युच्छिष्टैः स्पृशेत्तत्र कुर्य्यात्स्नानपनद्वयं। एतज्ज्ञानाभ्यासे स्नानपने धेनुद्वयं। उच्छिष्टेन तु शूद्रेण विप्रः स्पृ

ष्टस्तु तादृशः। उपवासेन शुद्धः स्यात् शुना संस्पृष्ट एव च। उच्छिष्टेन तु विप्रेण विप्रः स्पृष्टस्तु तादृशः। उभौ स्नानं प्रकुरुतः सद्य एव समाहितौ। अनुच्छिष्टशूद्रस्पर्शे उच्छिष्टब्राह्मणस्य नक्तमिति
प्रायश्चित्तविवेकः॥ अथ रजस्वलायाः रजस्वलादिस्पर्शप्रायश्चित्तं॥ काश्यपः॥ रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि। एकरात्रं निराहारा पंचगव्येन शुध्यति। रजस्वला तु संस्पृष्टा राज
न्या ब्राह्मणी तु या। त्रिरात्रेण विशुद्धिः स्यात् व्यासस्य वचनं यथा। रजस्वला तु संस्पृष्टा ब्राह्मणी वैश्यया तु या। पंचरात्रं निराहारा पंचगव्येन शुध्यति। रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी यदि।
षड्रात्रेण विशुद्ध्येत्तु ब्राह्मणी कामचारतः। अकामतश्चैव दर्द्धं ब्राह्मणी सर्वजातिषु। एतेन रजस्वलाया ब्राह्मण्याः सवर्णा रजस्वलास्पर्शे एकरात्रमुपवासः पंचगव्य पानं च कामतः अकामतः
स्तदर्द्धं नक्तव्रतं। असवर्णा रजस्वलास्पर्शे त्रिरात्र पंचरात्र षड्रात्रोपवासाः कामतः अकामतस्तदर्द्धं एतच्चतुर्थाह्नानन्तरं कार्यं। चंडालेन श्वपाकेन संस्पृष्टा चेद्रजस्वला। अतिक्रम्य
तान्यहानि प्रायश्चित्तं समाचरेत्। त्रिरात्रं उपवासः स्यात् पंचगव्येन शुध्यति। तानि शास्त्र व्यतिक्रम्य अजाघातान्तु कारयेदिति वचनान्तरदर्शनात् एतत् कामतः अत्र दिनभेदोपि नास्ति। अ
स्नानेपि बृहस्पतिः। पतितान्त्यश्वपाकैस्तु संस्पृष्टा स्त्री रजस्वला। तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्। प्रथमेह्नि त्रिरात्रं तु द्वितीये द्व्यहमाचरेत्। अहोरात्रं तृतीयेह्नि चतुर्थे नक्तमाच
रेत्। चतुर्थेह्नीति शुद्धिस्नानात्। पूर्वं ब्राह्मः। रजस्वला यदा स्पृष्टा श्वजंबूकखरैः क्वचित्। निराहारा भवेत्तावत् यावत्स्नानेन शुध्यति। अत्रापि बृहस्पत्युक्त दिनभेद व्यवस्था। वृद्ध-
शातातपः। रजस्वला तु ये नार्यौ अन्योन्यं स्पृशतो यदि। सवर्णे पंचगव्यं च ब्रह्मकूर्च्चमतः परं। पंचगव्यपानं व्रतरूपं तेन उपवासः। ब्रह्मकूर्च्चमाह जाबालः। अहोरात्रोषितो भूत्वा पौर्ण
मास्यां विशेषतः। पंचगव्यं पिवेत प्रात ब्रह्मकूर्च्च विधिः स्मृतः। एतदशक्तौ पुराणो कं दातव्यं। अतः परमुच्छिष्टशूद्रादिस्पर्शे भैरवः। शुना चोच्छिष्टया शूद्रा संस्पृष्टा द्व्यहमाचरेत्। अ

४२ होरात्रं तृतीयेह्नि परतो न कर्माचरेत्। परतश्चतुर्थदिने तत्रापि स्नानात् पूर्वमिति ज्ञेयं ॥ इति वन्द्यघटीय श्रीहरिहरभट्टाचार्यात्मज श्रीरघुनन्दनभट्टाचार्य विरचितं प्रायश्चित्ततत्त्वं ॥
संपूर्णम् ॥ हरिः ॐ तत्सत् ॥

प्रायश्चित्ततत्त्व ५० पत्रे ४.